नं. ५२९४

ऋगस्त्य संहिता.

× × × ×

पत्र. ४६ — सं. ×

विषय. तन्त्रम्.

अगस्त्य संहिता

५२९४

5294

F = 46

Complete

प्रगल्भसंहिता

श्लो. २३३५

अ. सं. ॐस्वस्तिश्रीगणेशायनमः ॐनमः श्रीरामाय ॐअगस्त्योनामदेवर्षिसन्नमोगौतमीतटे कदाचिद्दंडकारण्येसु
१ तीक्ष्णस्याश्रमंययौ प्रत्युद्गगामतंभक्त्यागंधपुष्पाक्षतोदकैः पाद्यार्घ्यार्हणंचक्रे तस्मैब्रह्मविदेमुनिः सुतीक्ष्ण
स्तंप्रणम्याह सुखासीनंतपोनिधिं श्रीमदागमनेनैवजीवितंसफलंमम अद्यजन्मसहस्रेणतपःफलतिवांछितं
कामक्रोधादिभिर्भूयः सदाहंपीडितोभवे नाद्यास्त्वंसम्यगिष्ट्वापिक्रतुभिर्भूरिदक्षिणैः सत्पात्रेसर्वदानानिदत्त्वापिमु
निसत्तम भवाब्धेस्तरणोपायंनतपस्तप्त्वापिदुःकरम् किंकरिष्याम्यहंतातकथयास्वामिचमेवद इत्युक्तःसोब्रवीत्तेन
कुंभभूर्विगतस्पृहः तत्त्वंविचार्यतत्सौवीपर्येणमुनिपुंगवः अगस्त्यउवाच अस्तिवक्ष्यामितेसर्वंरहस्यंहृष्टभय
ज्ञः यत्त्वत्त्वयादयत्सर्वंपार्वत्यैशंकरपयात्मवित् ईश्वरउवाच कामक्रोधादिभिर्दोषैर्दुष्टास्तत्रपुनःपुनः उत्पद्यंतेप्र
लीयंतेपुनर्भमोहितास्तथा रौरवादिषुपच्यंते पुनःसंसारिणोभुवि कर्मशेषात्प्रजायंतेपंगवंधवधिरादयः कृ
मिकीटादयोभूत्वापुनःसंसारिणोभुवि कुष्ठाद्युपहताकेचिद्घोरव्याघ्रादिभिर्हताः प्रविशंतिजलेमौवादेशाद्देशांत्र
जंतिवा परस्त्रीधनहर्तारस्तापयंतिसतः सदा देवब्राह्मणवित्तैस्तुयेवांजीवमनमन्वहं राजसस्तामसायेचहंतारो
वनजीविनः पुत्रदारादिभिर्ग्रस्ताःदुःखावर्तेभ्रमंत्यहो कलौपापेणसर्वेपिराजसास्तामसास्तथा निषिद्धाचरि

णः संतो मोहयंत्यपरान्बहून् यथाभूतः प्रभुर्लोके सेवकाः स्युस्तथाविधाः अतो मदीयाः सर्वे हिंसकास्तु प्रिया
प्रिये वश्याकर्षणविद्वेषस्तंभनोच्चाटनादिषु शास्त्रदावां समाराध्य भवंति फलभागिनः आवाभ्यां पिशितं रक्तं
सुरां वापि सुरेश्वरि वर्णाश्रमोचितं धर्ममविचार्यार्पयंति ये भूतप्रेतपिशाचास्ते भवंति ब्रह्मराक्षसाः पुनस्तद्
तेजायंते विप्रा वेदाधिकारिणः नतद्रूपेणजायंते स्वस्वदोषानुरूपतः पार्वत्युवाच नायं धर्मो हि देवेश परेषा
मुपकारकृत् अतो मे ब्रूहि देवेश धर्मोयस्त्वं कृपानिधे। ईश्वर उवाच सत्यं वदाम्यहं देवि यन्मां त्वं परिपृच्छसि हं
ता हं सर्वलोकानामतोहं सैव मे प्रिया ये वा भूतानि निघ्नंति विधिना विधिनापि वा समर्पयंति भूतेभ्यो मत्प्रियास्ते
सदा प्रिये अहं तमोमयो नित्यं हन्मि भूतानि भाविनि मत्कर्म हननं यस्मात्ततो हिंसैव मे प्रिया मत्कृत्याचारिणः
सर्वे वल्लभा मम वल्लभे लोकास्त्वामप्यनुरूपेण सेवां कुर्वंति सेवकाः भक्ष्यापर्यंति ये मह्यं तव वापि पिशितादिकम्
उत्पादयंति चानंदमंगेभ्योपि सुरेश्वरि तवापि ये मदीयानामस्माकं पिशितादिकं त्वमिमुत्पादयंत्येव विधिना विधिना
पितं ब्रह्मा सृजति भूतानि विष्णुस्तान्येव पालयेत् तान्यहं हन्मि भूतानि कृतिरस्माकमीदृशी रजोगुणालयो ब्रह्मा
विष्णुः सत्वगुणालयः तमोगुणालयो हं स्म स्वस्वकर्माणि कुर्महे तत्तद्गुणानुगुण्येन क्रियते स्माभिरीदृशं भवद्दे
स्तरणं देवि हिंसकानां सुदुर्लभं कामादिषड्विनानां ऽतो मुक्तिर्वदा प्रिये २९ ॥ इति श्री अगस्त्यसंहितायां

प्रथमोध्यायः १ ॥ पार्वत्युवाच किमुपास्यलभेन्मुक्तिं क्रिययावाक्रियाश्रमो मुमुक्षोः पुनरावृत्तिदुर्लभंभवभंजनं
ईश्वरउवाच शृणुदेविमहाभागेरहस्यंकथयामिते यज्ज्ञात्वामुच्यतेजंतुर्जन्मसंसारबंधनात् अप्राणिपादोजवनोग्र
हीतापीहनेत्रोप्यदृक् अकर्णःसशृणोत्येवशास्त्ररूपंपरंमहः वेत्तिवेद्यंससर्वज्ञो रवेद्योवेद्यतोप्रभुः समहापुरुषःपुंसांस्त्री
णांषंढव्यक्तिलक्षणः स्त्रीपुंनपुंसकाकाररहितःपुरुषोत्तमः सर्वेश्वरःसर्वरूपःसर्वदेवमयोहरिः सम्यग्ज्ञानमयोनंतो
नादिरानंदविग्रहः यज्ज्ञःस्मरणमात्रेणजन्मादिक्लेशभंजनः तस्मात्मनार्थीःसर्वेषांपुनरावर्तिकर्तिनी नियमेनैवव
र्णानांस्वाश्रमोक्तेनसप्रभुः ध्येयःसंसारनाशायनचैवावर्ततेपुनः स्वाश्रमोक्तंपरित्यज्ययआत्मानमुपासते तद्रूपे
णनतेदेविमुच्यंतेभवबंधनात् श्रुतिस्मृतिपुराणेषु योयोनियमउच्यते यस्ययस्याश्रमेपाल्यो नमुक्तव्योमुमुक्षुभिः
अतोनियममाहृत्यकुर्याद्ध्यानमनन्यधीः एतच्चराचरंविश्वंस्वप्नप्रत्ययवत्सुधीः मिथ्याहंव्यतिरिक्तंयदृश्यत्वा।
वायथाप्रिये दृष्टरूपेणात्मनात्मानंविज्ञानपरिकल्पितं एतत्स्वव्यतिरिक्तंयत्तस्यानंदात्मनःस्वयं एकाकीयतचित्तात्मा
चिंतयेत्तदनन्यधीः सोहमित्यात्मनात्मानस्वाज्ञानपरिकल्पितं एतत्स्वव्यतिरिक्तंययतःस्वेनैवकल्पयेत् नपारमार्थि
कंदेवियस्यालोपिकल्पयेत् बालालयोर्द्धिकाभेदः कल्पतेनत्ववस्तुषा अल्पेपथ्याःपुराणस्यादक्षहत्नःपुरातनैः अध्या
त्मविद्भिर्द्वैवोज्ञापिताःसपराःस्मृताः आब्रह्मशुद्धवंशानांमातापित्रोःकुलोचये नस्त्रियोव्यभिचारिण्यःपुरुषाश्चैवथा।

र्मिकाः यज्ञाश्चवेदाध्ययिनंसेवंतेप्रतिष्ठितंषं सृज्यंतेतियथायायज्ञगुरुशिष्यपरंपरा स्वापेक्ष्यस्खलतेनैवस्त्रीष्वपिब्रह्म
चारिष्व नियमोप्याश्रमस्तेषुकदाचिदपिभाविनि तत्कालेष्वन्नदानानितदार्थिभ्यः प्रदीयते येष्ववंशेषुसर्वेषांतेषा
मेवप्रकाशयेत् ब्रह्मब्रह्मविदांदेविगुरुशिष्योपशिक्षया स्वयमेवपरंब्रह्मततोन्यंनास्तिकिंचन तदेतदखिलंब्रह्म
सत्यंसत्यंप्रकाश्यते जन्मकोटिसहस्रेषुप्रक्षालितांशेषकिल्बिषैः कश्चिदेवनियम्यात्मनपरोक्षंनिरीक्ष्यते स्वबोधम
तरसास्वादसत्यैकज्ञानरूपता भागधेयेनविद्वांस्वयमेवानुभूयते अहोप्राणमहोधर्मोनातःपरतरंप्रिये प्रक्ष
तेष्वपिसर्वेषुप्रायश्चित्तमिदंपरं २४ ॥ इतिश्रीअगस्तिसंहितायां द्वितीयोध्यायः ॥ २ ॥ पार्वत्युवाच ॥
सर्वज्ञसर्वलोकेशसर्वदुःखनिषूदन सर्वेषांस्वागमःपंथाकोमेवददयानिधे ईश्वरउवाच शृणुष्वावहितादेविय
देतत्प्रतिपद्यते सर्वेश्वरःसर्वमयःसर्वभूतहितेरतः सर्वेषामुपकारायसाकारोभून्निराकृतिः सभक्तवत्सलोलोके
स्वयमेवविचेष्टते भक्तानुरूपयादेवोदुःखसुखमिवानुभूत् यदायदाचभूतानांभयमुत्पद्यतेतदा तत्तद्भयविघा
तायतद्रूपोव्यजायत मत्स्यकूर्मवराहादिरूपेणपरमार्थदृक् तत्तत्कालेषुसंभूयसर्वेषामप्युपाकरोत् सा
धूनामाश्रमाणांचभक्तानांभक्तवत्सल उपकर्तानिराकारस्तदाकारेणजायते अजोयंजायतेनंतःशांतोभूद्भू
तभावनः कदाचिदवतीर्णोयंसदभक्तानुकंपया क्षीराब्धेदेवदेवेशोलक्ष्मीनारायणोभुवि सशेषःशंखचक्राभ्यां

ग्र· सं देवैर्ब्रह्मादिभिः सह त्रेतायुगे दाशरथिर्भूत्वा नारायणो बभौ शेषोऽभूल्लक्ष्मणां लक्ष्मीः शंखचक्रे च जानकी जातो भरत
३ शत्रुघ्नौ देवाः सर्वेऽपि वानराः बभूवुरेवं सर्वेऽपि देवर्षिभयशांतये तत्र नारायणो देवः श्रीराम इति विश्रुतः सर्वलो
कोऽपिकारायश्रमोसायमवातरत् तपः कुर्वंति तं केचिद् दयरोन्नं निरीक्षितं पंचाग्निमध्ये ग्रीष्मे तु वर्षास्वभ्रविशेरते
3 शिशिरेषु जलेष्वेवं ततः केचन तेऽपिरे केचिद्गिरिं तां पर्यटंति कृत्वा धारणापारणं शोषयंति पुनर्देहमपरे कृच्छ्रचर्य
या कालक्षांद्रायणेनैव केचित्पार्वति नीयते शाकमेवापरे देहमश्नंतः शोषयंत्यहो इह केचिद्वारोद्वानक्तपाच
कभोजकाः चिंतयंति चिरं तत्त्ववने ह्येके हृन्निहृदि प्रसन्नमनसः श्वासं कृणायंत्यत्तमा त्वया जपंतो राम रामेति स्व
धामनि निधाय मनः प्रविलीयाम्रतीभूय सावंतिष्ठंति केचन सम्यग्धिमाभिगृत्वेन केचित्प्रासादिके वरे भावयं
ति चिरं देवि भगवान्प्राम येवुधाः परिचर्यापराः केचित् प्रासादेष्वेव शेरते मनुष्यविमतं दृष्टं विवदृत्तुं च बंधुवत्
अध्यापनाय विद्यानां योऽद्य मध्यपरेत ... चक्रिरे वैरिणो भूत्वा केचिद्वेष्यभृतेऽपिरे क्षीराहाराप्यरेषु ह्येक्षीरेष्वेव निषे
विरे चंचलास्तथ केषांचित्तपः स्मर्तं न शक्यते किं करिष्यति देवोयं रवं दृष्ट्वा सदारुणां तपस्तपस्विनामेतत्कृपया
त्वग्रहादिह मानुषीं भूय सर्वेषां भक्तानां भक्तवत्सलः ध्यानमात्रेण देवेशि महापातकनाशकृत् कीर्तनस्मरणा
देव हत्याकोटिनिवारणः राम रामेति रामेति ये वदंत्यपि पापिनः पापकोटिसहस्रेभ्यस्तांस्तु हरति नान्यथा

उग्रेणतपसातेषांसोभूद्देवंदयानिधिः यतोवाचोऽनिवदतिमनोभिःसहयोगिनां भागधेयेनसर्वेषांसअत्यन्तमगा
यत अहोभाग्यातिरेकेणमनुष्यायंव्यवाहरन् तपोददातिसौभाग्यंतपोविद्यांप्रयच्छति तपसादुर्लभंकिंचिन्ना
स्तिभाविनिदेहिनां अवाप्तसर्वकामोपिवांमनोगोचरेविभुः मनुष्यइवमानुष्यमादायअविमोदते अहोकृपाति
रेकेणसर्वंचसमुपैतिवै एतस्मिदपिकिंलाभादधिकंगजगामिनी तपोधनेतपोभाग्यंतपःसर्वत्रसिद्धिदं अतस्त
पस्विनांदेविदासत्वमपिदुर्लभं ॥ ॥ इतिश्रीअगस्तिसंहितायांतृतीयोध्यायः ३ ॥ पार्वत्युवाच
योगीन्द्रवंद्यचरणाद्वंद्वानंदैकलक्षणं कथमेवमुपास्यैनंभक्तिंसर्वेपिभेजिरे तदेतद्ब्रूहिदेवेशाययस्तिकरुणामयि
ईश्वरउवाच हिरण्यगर्भसिद्धांतरहस्यमनघेशृणु यज्ज्ञात्वामुच्यतेमोहाद्दौर्भाग्यव्याधिसंचयात् भद्रेतदानिदा
स्यामितत्साररयाहिणीमम सर्वंब्रह्मातपस्तेपेकल्पकोटिशतत्रयं मुनीन्द्रैःबहुभिःसार्द्धंदुर्द्धर्षानशनव्रतं पुरस्कृ
त्याग्निमध्यस्थस्तदाराधनतत्परः आदरातिशयेनस्यनैरंतर्यार्चनादिना चिरायदेवदेवोपिप्रत्यक्षमभवत्तदा किंच
पुण्यातिरेकेण सर्वेषांतस्यचप्रिये नवनीलांबुदश्यामः सर्वाभरणभूषितः शंखचक्रगदापद्मजटामुकुटमंडि
तः किरीटहारकेयूर रत्नकुंडलशोभितः संतप्तकांचनप्रख्यपीतवासोगुणान्वितः तेजोमयःसूर्यसोमविद्युदुद
ल्कानिकोटयः मीलिताभिर्भवंतीवप्रादुरासीत्स्वरःप्रभुः स्तंभीभूयतदाब्रह्मातत्क्षणंतस्थौविमोदितः तुष्टावमुनि

ग्र. सं
४

भिः सार्द्धं प्रणाम्य च पुनः पुनः धन्योस्मि कृतकृत्योस्मि कृतार्थोस्मीह बंधुभिः प्रसन्नोसीह भगवान्जीवितं सफलं मम क
थं स्तोष्याम्यहं देवं भगवन्निति चिंतयन् ऋग्यजुःसामवेदैश्च शास्त्रैर्बहुभिरादरात् सर्वैः मन्वादिभिर्द्धर्मप्रतिपादनतत्परैः
त्वद्गुणावेत्तुमसमर्थ्यं संतुष्टोसि मुनिभिः पुनः त्वमेव विश्वतश्चक्षुर्विश्वतोमुख उच्यते विश्वतोबाहुरेकः सन् विश्वतस्पात्तथापरः
जनयन्भूर्भुवो लोकौ स्वर्लोकैः सर्वशासकः अतस्त्वामपि वाङ्भ्यां कर्मभ्यां भुवनत्रयं पद्भ्यां च नासिकाभ्यां त्वं सर्वं स
र्वत्र पश्यसि समाप्तेस्तु श्रोणाश्चैव तत्सर्वं गच्छसि सर्वकृत् जिह्वयैव न ते किंचिदविज्ञातं शंभो त्विह ब्रह्मा विष्णुश्च रुद्रश्च त्व
मेवानन्त केशव सहस्रशीर्षः पुरुषः सहस्राक्षः सहस्रपात् पृथिव्यप्तेजसो रूपं मरुदाकाशयोरपि कार्यं कर्ता कृ
तिर्देवकारणं त्वं हि केवलं अणोरणीयान्महतो महीयान्मध्यतः स्वयं मध्योसि निर्विकल्पोसि यस्त्वां देवानुगच्छति
एवमादिबहुस्तोत्रैः स्तुतः स परमेश्वरः वैदिकैः कृपया विष्णुर्ब्राह्मणमिदमब्रवीत् स्तुतस्तुष्टोस्मि ते ब्रह्मन् उग्रेणात
पसा धना वृणीष्व यदभीष्टं ते दास्यामि कमलोद्भवः इत्युक्तः सोब्रवीत्तेन विष्णुना प्रभविष्णुना तुष्टोसि चेद्यदि देवेश
दास्यं मे स्वीकरिष्यसि अभीष्टं देवदेवेश यद्यस्ति करुणा मयि अनेनाभाग्येन दारिद्र्यदुःखेनाहं सुदुःखितः प्रतिभा
ति च देवेश सर्वमस्माकमीदृशम् किं करिष्यामि देवेश हृदि मे पुरुषोत्तम कामक्रोधादिभिर्दोषैर्दुष्टाः सर्वेपि मेऽत्र
जा मर्त्याजित विशेषेण न कश्चिदवशिष्यते कोपायो मनुष्याणां भक्तानां भक्तवत्सल एतच्छरीरपातान्ते न परंश्र

क्तिसिद्धये एतदुक्तः स देवो मे भुक्तिमुक्तिप्रसिद्धये किंचिद्विचार्य कृपया षडक्षरमुपाविशत् एकैकवर्णविन्यासं
क्रमं योगानिषट्पुनः तद्विधिं विनियोगं चार्थं मंत्राक्षराणि च रहस्यं देवदेवोपि तन्मिथः समबोधयत् तस्य तन्मा
त्रिमात्रेणा तदानीमेव तत्फलं सर्वाधिपत्यं सर्वज्ञमबोध्यस्यामभवत्तदा किं चास्य भगवत्वं च यदिष्टं तदभूदपि स
र्वेश्वरप्रसादेन तपसा किमलभ्यते मुनीनामपि सर्वेषां तदा बलात्तदाज्ञया उपादिदेश तत्सर्वं तत तस्तं विस्तरत्रवी
त् ऋषिर्भवास्य मंत्रस्य ब्रह्मन्त्वं सर्वमंत्रवित् रामो हं देवता छंदो गायत्री छंदसां परा मांतो यां तो भवेद्बीजमाद्य
माद्यफलप्रदः नमः शक्तिर्यो दिष्टो नमोंतो मंत्रनायकः रामाय मध्यमो ब्रह्मन् सर्वं तस्मै निवेदयन् इह भुक्ति
मुक्तिप्रदेहांते संभविष्यति यदन्यदपि भीष्टं स्यात्तन्मत्प्रसादात्प्रजायते अन्वतिष्ठाद्दरेणैव निरंतरमनन्यधीः
चिरं मद्गतचित्तस्त्वं मामेवाराधयेश्चिरं मामेव मनसा ध्यायन्मामेवैष्यसि नान्यथा एवं तदेत द्विस्तार्य शिष्येभ्यो ब्र
हि विस्तरात् इत्युक्त्वांतर्दधे देवस्तत्रैव कमलेक्षणः प्रजापतिश्च भगवान्मुनिभिः सार्द्धमन्वहं अन्वतिष्ठद्विधाना
त्तिनिःष्टिय्यात्ज्ञाधिरस्यय ब्रह्मा तदा भीः सर्वेषामुपदेष्टा बभूव ह अर्थेनवापि तेनैव सर्वाभीष्टं भविष्यति ४० ॥
इति श्री अगस्तिसंहितायां चतुर्थोध्यायः ४ ॥ सुतीक्ष्ण उवाच भगवन्नन पुराणज्ञ सर्वशास्त्रार्थवित्तम तत
क्षिमकरोद्दिव्यश्रेष्ठागस्त्याविकातदा ईश्वरश्चैन रूपेणतामेतामबोधयत् अगस्त्य उवाच तदा हि हृदये रामं नि

अ.सं
५

धायकमलेक्षणा शृणुयेनिश्चितेनातिस्मतमनन्यपरायणा हिरण्यगर्भसिद्धांतरहस्यश्रवणात्परं कामादियस्त
तातन्नाचिरमेवन्यवर्तत ईश्वरस्तांप्रियांसम्यग्ज्ञानमात्रेणसंस्थितां न्यवर्ततततोज्ञात्वासंसाराच्छित्तिवांछया
तामब्रवीत्सभगवान् ईश्वरःसर्वकामधुक मूलप्रकृतिराद्यात्वंपुरुषोहंसनातनः कारणंजगतस्त्वेतत्त्वनद
नुवेत्तणं ऊर्वहेस्मान्नत्वच्छित्तिर्यदि किंतद्धितंनव कल्याणिममकिंवल्लभा ‥ येनतत्परं कार्यंहिकारणा
भावेऊत्रसंपद्यतेवद आवयोःसंभविष्यतिसतोकल्याणिदेवताः त्वत्प्रसादादिदंसर्वं नकदाचिद्भविष्यति
एवंवसतिकिंदेविसर्वंत्वत्कृतमपेक्ष्यमे नप्रकृमेतत्किमपित्वत्कृतेदेव्याश्रुतात्वया इत्युक्तासाब्रवीद्देवीनीलोत्प
लदलेक्षणा प्राणनाथा ‥ किम्मेकर्तव्यमितिसाब्रवीत् इयंसहासनामृतोनैवोत्सनाभवत्प्रभो कदाचिद्दा
पिमेनाथत्वंतथात्वगृहाणमा तथोक्तःसब्रवीद्देवांहिमाद्रितनयांप्रनः श्रीरामाराधनंदेवितत्स्वर्थंप्रतिवासरे
आराधनोपकरणैरन्यथामाकृथाः प्रिये एतेनैवभयंकिंचिदिहामुत्रभविष्यति कलौसंकीर्तनेनैवसर्वाघौघंविन
श्यति आराधनेनसंगेनगंधपुष्पाक्षतादिभिः किंवक्ष्येप्रियेसर्वंमनसाचिंतितंचयत् एवमाराधनेनैवभवि
ष्यतिनचान्यथा नगृहीज्ञानमात्रेणपरत्रेहचमंगलं प्राप्नोतिचंद्रवदनेदानहेमादिभिर्विना गृहस्थायदिदाना
निनदद्यात्कृदादपि पूजयेद्विधिनानैवकःकुर्यादेतदव्ययं नब्रह्मचारिणोदात्रमधिकारोस्तिभाविनि शुक्ल

भ्योऽरत्र सर्वेभ्यः कोऽवादास्यत्यपेक्षितं नाराणवासिनां शाक्तिर्न्नेते संतिकलौ युगे परिव्राड्ज्ञानमात्रेण दानहोमा
दिभिर्विना सर्वदः स्वपिशाचेभ्यो मुक्तो भवति नान्यथा परिव्राड विरक्तस्य विरक्तस्य गृहीतया ॐभीपाको निम
ज्जेते ताङ्गभोऽकमलानने गुणान्विद्यो गृहस्थानां मंगले मंगलार्थिनः पूजोपकरणोद्देश्यदानानि बहुचार्हणा चंद
नागुरुकस्तूरीसकर्पूरहिमांशुभिः पंचामृताभिषेकैश्च पुष्पैस्तामरसैरपि पुष्पमाल्यैश्च बहुभिर्दूर्वाभिश्चाक्ष
तैस्सह नीलोत्पलैर्मल्लिकाभिः करवीरैश्च चंपकैः जातीपत्रैर्बिल्वैश्च पुंनागैर्बकुलैरपि कदलीकेतकीपुष्पै
र्वीरणाशोककिंशुकैः नागरानादिपुष्पैश्च गंधवद्भिर्मनोहरैः प्रत्यग्रैश्चाम्लानैश्चैव पूजयेद्गुः प्रयत्नतः पल्लवैश्चैव
पत्रैश्च जलस्थलसंभवैः एवमादिभिरन्यैश्च पुष्पैर्बहुभिरन्वहं सम्यक् संपादयत्नेन यथाशास्त्रानुचारहं नमम्
त्रिकालमेककालं वा पूजयेद्गुरुमहर्निशं प्रत्याहृतैर्बहुविधैः पिष्टकैरिष्टसिद्धये क्षीरनीराज्यपक्वैश्च फेनाप्यपव
टादिभिः दध्योदनान्नपानीयैः सूपादिव्यंजनैरपि वटीवटोपशाकादिपदार्थैर्बहुविस्तरैः आरार्तिकैर्धूपदीपै
र्घडाहृतैरुपकल्पितैः बहुभिर्दीपमालाभिरर्चयेद्गुरुमहर्निशं कंकोलैलामृगफलैस्तथाजातीफलैरपि कर्पूरसह
र्णीसहितैस्तांबूलैश्च सुवासितैः महादेवार्हणां कुर्यात्क " न्यार्थीत यात्वहं स्वस्वशक्त्यानुसारेण सर्वसंपाद्य
यत्नतः गृहस्थानां विधिरयं नेतरेषां वरानने दशपूर्णाभिर्बहुशर्चिते मोक्षमार्थिनः कल्याणं च वरारोहे रामापि

अ॰ सं ६ णधियान्वहं एवंगृहस्थनियमंस्तथैवब्रह्मचारिणां विधिमप्यनतिक्रम्ययथाशक्त्यनुसारतः यदिकुर्युः प्रयत्नेन
पूजांतत्साधनैरिह सर्वसंपद्यतेतेषांदेवानांदुर्लभंचयत् कल्याणिशृणुमच्चकोयदिकल्याणमिच्छसि रामसमा
राधनायातियावज्जीवंयथाविधि एतेनैववरारोहेकल्याणंतवसर्वदा गृहपतिर्योगृहस्था — तथैवब्रह्मचारिणः
6 सगुणंराममाराध्यसर्वाङ्गैः साधनैरपि शक्त्यासंपादितैस्तैश्चित्तज्ञयेपुर्दिवानिशं तेषांभुक्तिश्चमुक्तिश्चभवत्येवन
चान्यथा वानप्रस्थाश्चयतयोयद्येवंकुर्युरन्वहं संसारान्ननिवर्तन्तेविधातिक्रमदोषतः आरूढपतितास्तेतेभवेयुः
दुःखभागिनः अहिंसापरमोधर्मस्तेषामेषानपद्धतिः नहिंसाव्यतिरेकेणालभ्यन्तेतानितानिवै भवनाकल्पितैः
पूजासाधनैरेवपूज्यते नवहिर्योगयुक्तानांमतस्तेषांप्रशस्यते एतच्चकेदापियामेवसेव्यतेब्रह्मरूपतः ध्यानमप्य
चैनाभक्तैर्भक्तार्थफलदंयतः आत्मनस्तत्वचिन्तांवतस्याध्यात्मावचिन्तनं उभयोरैक्यचिन्तांवप्रनरावर्तयेन्नत्व
आत्मानंसततंरामसंभाव्यविहरन्तिये नतेषांदुःखतंकिंचिद्दुःखतोध्यानवापदः ५४ ॥ इतिश्रीअगस्तिसंहि
तायांपंचमोध्यायः ॥ ५ ॥ सुतीक्ष्णउवाच किमेतद्भगवन्ब्रूहि हित्वामध्यांगुलिरहः नत्कंपिवसिमाहा
त्म्यश्रीःतुलस्याःकथितंस्मृतं अगस्त्यउवाच शृणुवक्ष्यामिमाहात्म्यंतुलस्याश्चप्रयत्नतः सर्वंश्रुयतपःकृत्वा
वरंवव्रेतपस्विनी तुलसीसर्वपुष्पेभ्यः पत्रेभ्योवल्लभापतः विष्णोस्त्रैलोक्यनाथस्यरामस्यजनकात्मजा प्रियातथै

६

व तुलसी सर्वलोकैकपाविनी तुलसीपत्रमात्रेण योऽर्चयेद्राममव्ययं स याति शाश्वतं ब्रह्म पुनरावृत्तिदुर्लभम् ।
नीलोत्पलसहस्रेण प्रत्यहं योऽर्चयेद्धरिं फलं वर्षसहस्रेण तदीयेनैव लभ्यते विहाय सर्वपुष्पेषु पंकजं श्रेष्ठ
मुच्यते तत्पुष्पेष्वर्पितं माल्यं लक्षकोटिगुणं भवेत् विष्णोः शिरसि विन्यस्तमेकं श्रीतुलसीदलं अनंतफलदं वि
द्वान् मंत्रोच्चारणपूर्वकं पुष्पांतरैरंतरितं निर्मितं तुलसीदलैः माल्यं मलयजालिप्तं दद्याच्छ्रीराममूर्द्धनि किं त
स्य वक्ष्ये मखैर्यज्ञैः संपूर्णवरदक्षिणैः किं तीर्थसेवया दानैरुग्रेण तपसा तथा वाचा नियम्य चात्मानं मनो विष्णौ निधा
य च योऽर्चयेत्तुलसीमाल्यैर्यज्ञकोटिफलं लभेत् भवाब्धिकूपमग्नानामेतदुद्धारकांक्षिणां पत्रं पुष्पं फलं चैव श्रीःतुल
स्याः समर्पितं रामाय भक्तिमार्गस्य द्योतकं सर्वसिद्धिदं माल्यानि ददते लक्ष्मीरुत्तमांतरितानि च तुलस्याः सर्वमा
नीय निर्मितानि तपोधन तुलसीवाटिकापुष्पपर्यंतरशताहृता शोभते राघवस्तत्र सीतया सहितः स्वयं आरा
पयंति तद्भक्त्या स्वयमेव मनीषिणः कृतत्वेन समाहृत्य कंटकीस्तुलसीदलं अथ नान्यत्र देवेषि नाभ्यदभ्यर्हितं त
तः सालग्रामशिलातीर्थं तुलसीदलवासितं ये पिबंति पुनस्तेषां स्तन्यपानं न विद्यते गांगेयमिव तोयेषु देवे
ष्विव रघूत्तमः सरोजमिव पुष्पेषु शस्यते तुलसीदलं संपूज्य भक्त्या विधिवद्रामं श्रीतुलसीदलैः भवांतरस
हस्रेषु दुःखयाद्धाद्विमुच्यते वर्णाश्रमेतराणां च सज्जायस्यैव साधनं अपेतितार्थदं नान्यज्जगत्स्वपितपोधन

श्र॰सं ७

स्नायोगैर्यदलैः पत्रैः पुष्पैर्वा योऽर्चयेद्धरिं यांतितस्यनालितिक्तानिकर्माणिफलितान्यहो न तस्य नरके क्लेशो योऽर्च
येत्तुलसीदलैः पापिष्ठो वाप्यपापिष्ठः सत्यं सत्यं न संशयः गंगातोयेन तुलसीदलयुक्तेन योऽर्चयेत् रामं निःत्रि
ष्पशिरसि समंत्रेण सिंचयेत् निर्माल्यवस्त्रं शाधीरो रामं हृदि निधाय च असकृद्दसकृद्वापि य एवमनुतिष्ठति
ध्येयो भवति सर्वेषां मयमेव विमुक्तये न सति गुरवो यस्मानैव दीक्षाविधिक्रमः रामरक्षां वदंते च तुलंदलमर्प सी
येत् दीक्षांतरप्रातेनापि न तत्फलमवाप्यते दीक्षितेष्वपि सर्वेषु रामदीक्षित उत्तमः न गुरुनैव कालंश्च नदे
वांतरपूजनम् तुलसीदलयुक्तं च रामार्चनमपेक्ष्यते निर्माल्यतुलसीमाल्ययुक्तो यश्चार्चयेद्धरिं यद्यत्करोति
तत्सर्वमनंतफलदं भवेत् यद्यन्नूनं भवत्येव समाराधनसाधनं तुलसीपत्रमात्रेण त्वक्तं तत्परिपूर्यते शालग्रा
मशिलायां च गंगायां च तपोधन तुलस्याश्चैव माहात्म्यं नेष्टवक्तं हरिःस्वकृत् भवभंजनमेतद्धि सर्वाभीष्टं प्रयच्छ
ति नातः परतरं किंचित्पावनं भुवि विद्यते यः कुर्यात्तुलसीकाष्ठैर्रत्नमालस्वरूपिणीं वर्णमालां प्रयत्नेनकृतंतस्या
क्षयं भवेत् संगृह्य तुलसीकाष्ठैर्यो दद्याद्दाम मूर्धनि कर्पूरागरुकस्तूरीचंदनं च न तत्समं तुलसीविपिनस्यापि
समंतात्पावनं स्थलं क्रोशमात्रं भवत्येव गंगायाः स्रोतमो यथा तुलस्यारोपितासिक्ता दृष्टा स्पृष्टा च पावयेत् आरा
धिता प्रयत्नेन सर्वकामफलप्रदाः वर्णानामपि वर्णिनामाश्रमाणां विशेषतः स्त्रीणां च पुरुषाणां च पूज्यतेष्टदं ७

दातिहि प्रदक्षिणं तत्र भूयिष्ठं नमस्कुर्वंति नित्यशः न तेषां दुष्कृतिं किंचिदक्षीणमिह दृश्यते अनन्यदर्शनाश्रा
तः ये पश्यंति तत्पादयुग्मं न तेषां नरके क्लेशः प्रयांति परमं पदं विधेयमविधेयं वाप्यस्त्वमप्यथवाधिकं तु
लसीदलमादाय रामं ध्यात्वा समर्पयेत् रामाय नम इत्येव अच्युताय नमस्ततः अनंताय नमस्तस्मात् प्रणा
वादिवदेदिदं सकृत्तं सफलामेति तुलसी सन्निधौ मुने ४२ ॥ इति श्री अगस्त्यसंहितायां षष्ठोऽध्यायः ६
सुतीक्ष्ण उवाच अगस्त्य वद मे सर्वं रामस्य मुनिसत्तम मंत्रराजस्य माहात्म्यं यदुक्तं ब्रह्मणा पुरा अगस्त्य उवाच
सर्वं तवाभिदास्यामि पुरा वै पुरतः पुरा ब्रह्मा यदब्रवीत्तत्त्वं शृणु श्रद्धावहितो मम अस्ति वाराणसी नाम पुरी शिवमनो
हरा सर्वदापि शिवस्तत्र पार्वत्या सह तिष्ठति तस्यास्तूपासकाः सर्वे भक्त्या तं प्रतिपेदिरे मुमुक्षवः परित्यज्य सर्वं
तत्रैव संस्थिता सदा शिव शिव शिवेत्येव वदंतः शिवतत्पराः शिवार्पितमनःकाया वाचा शिवपरायणाः शिवस्ता
न गुरुः पश्यन् आस्ते चिंतासमाकुलः कथमेभ्यः प्रदास्यामि मुक्तिमित्यतिदुःखितः शिवार्पितमनःकाया तत्रैवा
स्ते गणैः सार्धं महर्षिभिः सुरासुरैः एवं स्थिते च भूर्लोकमाजगाम पितामहः तमीश्वरो निरीक्ष्यैव संभ्रमेण करोत् स्व
यं बहु संभावयामास यद्धितं तन्निवेदयत् ततः स प्राह भगवानीश्वरस्तं पितामहं कुशलेन च ते ब्रह्मन् चि
रायित्वमिहागतः श्रीमदागमनेन लोकपूज्योप्युपासकैः समाराध्येहमामुक्तिं प्रार्थयंति मुमुक्षवः केन॥

पायेनतेषांतत्फलंदास्यामितद्वद ईश्वरोगौरवमुक्तस्त्वइहिणापिविभाव्यद अस्तिपायोगोपनीयः प्रादाय्यंमेरहस्यत
मः तपःकृत्वाचिरायाहंतेपरंलब्धवान्परं ततोन्यामदभिज्ञातोनास्त्युपायोमहेश्वरः स ह्यामग्रग्रहीद्रामोनस्तदे
होस्मितत्रवै ईश्वरउवाच अथकिमेवदस्यत्वंमयियद्यनुकंपसे सतेनाभिहितोदध्यौ कंकदाशुक्रपित्यपि पु
ण्यतीर्थेचगंगायांलोलार्केसूर्यपर्वणि तस्मैमंत्रवरंप्रादान्मंत्रराजंषडक्षरं नियतःसोपितत्रैवजगामहदपमय
जः मन्वंतरशतंभक्त्याध्यानहोमार्चनादिभिः ततःप्रसन्नोभगवान् श्रीरामःप्राहशंकरं वृणीष्वयदभीष्टंते
देवानामपिदुर्लभं तद्देवाहंप्रदास्यामिमाचिरंवृषभध्वज ततस्तमब्रवीद्विश्वमीश्वरापरयामुदा दर्शनेनैव
तेधन्यःकृतार्थास्मिममेप्सितं एतेमदीयाःसर्वेपिमांपरंपर्युपासते मुक्त्यर्थंतत्कृतेषांतदेवाभिमतंममना
तःपरतरंकिंचित्प्रार्थितंममविद्यते एवंतदपितत्रैवतदानीतदुपासकाः सर्वेज्योतिर्मयाःसंतोविमानैर्वलयं
गताः ततःप्रवोचरामस्तंपुनरीशंयदासिते ब्रह्मीश्वरात्रतंदास्यप्रार्थनादुर्लभंचयत् इत्युक्तःसपुनर्देवेहितकृ
द्भक्तवत्सलः सर्वलोकोपकारायसर्वेषामपिदुर्लभं येस्वतोवान्यतोवापियत्रकुत्रापिवाप्रभो प्राणान्परित्यजं
तिचमुक्तिस्तेषांफलंभवेत् गंगायांवातटेवापि यत्रकुत्रापिवापुनः म्रियंतेयेप्रभोदेवमुक्तिर्नांतोवरांतरं श्रीरा
मउवाच तेत्रैवतवदेवेशयत्रकुत्रापिवामृता कृमिकीटादयोप्याशुमुक्ताःसंतुनचान्यथा त्वत्तोवाब्राह्मणोवा

पिबेल्लभेत षडक्षरं जीवंतो मंत्रसिद्धास्युः पुत्रकामांश्च लभंत्यपि तेत्रैस्मिन्योर्वयेद्रत्यामंत्रेनानेन शंकर ग्रहं सन्नि-
हितस्तत्र पाषाणप्रतिमादिषु मुमूर्षोर्दक्षिणे कर्णे यस्य यस्यापि वा स्वयं उपदेक्ष्यसि मन्मंत्रं स मुक्तो भविता शिव
इत्युक्त्वंति देवेशि पुनरप्याह शंकरः महात्मनामभिमानेन च तेत्रै त्रैलोक्यदुर्लभे फले भवतु देवेश सर्वेषां मुक्तिल-
क्षणं मुमूर्षूणां च सर्वेषां दास्ये मंत्रवरं परं इत्येवमिति ततो विस्मस्तस्मै दत्वा वरांतरं यदभीष्टं पुरस्तस्य तत्रैवांतरधी-
यत तदादि तदभून्मुक्तिः तेत्रै त्रैलोक्यपावने तत्र तिष्ठंति ये भक्त्या यावज्जीवनियम्यते मुक्तिभाजो भवंत्येव सत्यं सत्यं
न संशयः २२ ॥ इति श्री अगस्त्यसंहितायां सप्तमोध्यायः ७ ॥ सुतीक्ष्ण उवाच कथं मंत्रवरं भूमौ केन
वा दौ प्रतिष्ठितं उपाधिदेशकः कस्मिन्नस्मे ब्रूहि तपोधन अगस्त्य उवाच ब्रह्मा ददौ वसिष्ठाय स्वसुतायमंत्रं ततः
स वेदव्यासपुत्रनये ददाविस्यं गुरुक्रमः वेदव्यासमुखेनात्र मंत्रो भूमौ प्रकाशितः वेदव्यासो महातेजाः शिष्यैः
समुपाविशत् गुरुशिष्यगणानादौ शौनकायब्रवीन्मुनिः स शौनकेन पृष्टः सन्नाहमंत्रांतराणि च यंत्रस्तज्ञाविधि
र्हीमतथा तर्पणलक्षणं पुरश्चरणसंख्या च होमद्रव्यांतराणि च तपःस्थानानि सिद्धिं च यडक्षं ब्रह्मणा पुरा तत्तदु
क्तं प्रवक्ष्यामि यदि श्रोतुमिहेच्छसि सुतीक्ष्ण उवाच देवतोपासकः शांतो विषयेष्वपि निस्पृहः अध्यात्मवित्ब्रह्म
वादी वेदशास्त्रार्थकोविदः उद्धर्तुं चैव संहर्तुं समर्थो ब्राह्मणोत्तमः मंत्रज्ञो यंत्रमंत्राणां येत्र वेत्ता रहस्यवित् पुरश्चर-

श्रे. सं णसंख्याचहोमद्रव्यांतराणिच तपःस्थानानिसिद्धिंचयदुक्तंत्वलाणाश्वरा तत्तदुक्तंप्रवक्ष्यामियदिष्टोत्तमिदेक्क
५ सि सतीसाउवाच देवतोपासकःशांतोविषयेष्वपिनिस्पृहः अध्यात्मवित्ब्रह्मवादी वेदशास्त्रार्थकोविदः
उद्धर्तुंचैवसंहर्तुं समर्थोब्राह्मणोत्तमः मंत्रज्ञोयंत्रमंत्राणांयंत्रवेत्तारहस्यवित् पुरश्चरणकृत ˮ मंत्रसिद्धोप्रयो
गवित् तपस्वीसत्यवादीचगृहस्थोगुरुरुच्यते आस्तिकोगुरुभक्तश्चजितात्मः श्रद्धयासह कामक्रोधादिदुःखोप्यवै
राग्यावनितादिषु सर्वात्मनातितीर्णश्चभवाब्धेभवदुःखवित् ब्राह्मणोधर्ममोक्षार्थकामार्थविगतस्पृहः किंवा
9 धर्मार्थमोक्षार्थनिष्कामश्चाध्यवादिजः मनोवाक्कायधर्मैस्तुनित्यंशुश्रूषिकोगुरोः स्ववर्णाश्रमधर्मोक्तकर्मनिष्ठः
सदाशुचिः शुचिव्रततमाशूद्राःधार्मिकाः द्विजसेवकाः स्त्रियःपतिव्रताश्चान्येप्रतिलोमानुलोमजाः लोकाश्चा
डालपर्यंताःसर्वएवात्राधिकारिणः स्वजातिधर्मनिरताःभक्ताःसर्वेश्वरस्यये उपदेश्याःसमस्तेषांतत्तज्जात्यनुसारतः
अलसामलिनाक्लिष्टाःदांभिकाःकृपणास्तथा दरिद्राद्रोगिणोत्कृष्टारागिणोभोगलालसाः असूयामत्सरग्रस्ताः
शठाःपरुषवादिनः अन्यायोपार्जितधनाःपरदाररताश्चये विदुषांवैरिणश्चैवअज्ञाःपंडितमानिनः भ्रष्टव्रता
श्चयेकष्टवृत्तयःपिशुनाःखला बह्वाशिनःक्रूरचेष्टाःक्रूरात्मानश्चनिंदिताः इत्येवमादयोप्यन्येपापिष्ठाःपुरुषाधमाः
नतेषांनरकक्लेशानिस्तारोस्तिसत्तम लुब्धाःप्रलोभेनस्तेतेनिंदितेभ्योदिशंतिये विनश्यत्येवतत्सर्वंसेकतेष्वा

५

लिबीजवत् यैः शिष्यैः शिष्यदावात्तु गुरवोऽवमानिताः पुत्रमित्रकलत्रादिसंपद्भ्यः प्रच्युता हि ते अशक्तेभ्यो
निवार्यस्वगुरुशिक्षासद्भिस्सवः एवंभूताः परित्याज्याः शिष्यत्वेनोपकल्पिताः यदि ते ह्युपकल्प्येरन् देवताक्रो
शाकाज्जनाः भवंतीह दरिद्रास्ते पुत्रदारविवर्जिताः नरकाश्चैव देहान्ते तिर्यक्त्वं प्रभवंति ये येऽशैववत्तांकुर्वी
ति पापिष्ठाः पुरुषाधमाः अपि तिष्यगुरुम्मोहात्पुरुषं प्रवदंति ये शूकरत्वं भवत्येव तेषां जन्मशतान्ध्रुवं ये गुरुः
द्रोहिणो मूढाः सततं पापकारिणः तेषां च यावत्साक्षात्तं तद्भस्मस्यान्न संशयः तारादि शुक्रये लक्ष्मीबीजादि
शुक्रये तथा वाक्पत्तिहृदये च वाग्बीजं प्रणवांते विनिक्षिपेत् मानामयं सर्ववश्याय यदेतन्त्रितयं पुनः तारांते चैव रा
मादौ सर्वार्थं विनियोजयेत् रामायनमः इत्येषमंत्रः पंचाक्षरः स्मृतः रामित्येकाक्षरो मंत्रो रामः इत्यपरो मन्त्रः चंद्रा
तश्चैव भद्रांतः पुनर्वेदा विभज्यते पंचाशन्मातृकावर्णाः प्रत्येकं रामपूर्वकः लक्ष्मीवाङ्मथादिश्च सर्वं च प्रणा-
वादिकाः रामश्चंद्रभद्रांतश्चतुर्थ्यंतीह दासक बहुधाभिधेयते तारसहितो यं षडक्षरः एकधा च द्विधा त्रेधा चतुर्धा
पंचधा तथा षट्सप्तधाऽष्टधा चैव बहुधायं व्यवस्थितः मंत्रो यत्तु पदेष्टो वा ब्राह्मणा यत्तु रूपतः संक्षेपविधिव
त्र संख्याप्यकल्पशंनवं तन्त्रामर्थ्यात्तु रूपेणास्त्रवर्णामयस्तथा दात्राप्रदीयते यत्तु मंत्रो देयस्तथा सुने २१
इत्यगस्तिसंहितायां अष्टमोऽध्यायः ॥ ८ ॥ सुतीक्ष्ण उवाच ॥ किं तद्यंत्रं वद ब्रह्मन्नस्वयं तस्य च वा नव

कैमेंत्रैर्वा कथं यंत्रलेखं किं तेन वा भवेत् अगस्त्य उवाच मनोरथकरान्यत्र निर्बध्नं तेन तपोधन कामक्रोधादिदो
षाद्यदीर्घयंत्रनियंत्रणात् यंत्रमित्याहुरेतस्मिन्नामः प्रीणाति पूजनात् यंत्रं मंत्रमयं प्रोक्तं देवता मंत्ररूपिणी
यंत्रे तु पूजितो रामः सहसा न प्रसीदति श्रीरामः पूजितो यंत्रे सीतया सह यंत्रितः यदिष्टं तत्करोत्येव तनन्नं
त्रवराहते शरीरमिव जीवस्य रामस्य मंत्र उच्यते यंत्रं मंत्रं समाराध्य यदभीष्टं तदाप्नुयात् यंत्रे मंत्रं समाराध्य
प्रसादयति राघवं सर्वेषामपि मंत्राणां यंत्रे पूजा विधीयते यंत्रस्वरूपं वक्ष्यामि यथोक्तं ब्रह्मणा पुरा प्रोक्तं षट्
कोणमष्टपत्रं ततो हृत्तं लिखेन्मुने दलानि विलिखेद्दक्षो ततः स्याच्चतुरस्रकं सर्वलक्षणसंपन्नं प्रोक्तं सर्वमनो
हरं तदंतरेपि स्वष्कं साध्याख्याकर्मगर्भितं तद्वीजं विलिखेद्भूयस्तत्कोडीकृत्य नामथ ततस्तत्पंचवीजानि
पुनरावर्तयेन्मुने पुनर्दशाक्षरेणैव तदेव परिवेष्टयेत् षडंगान्यग्निकोणादिकोणेष्वेव लिखेत्क्रमात् न
ध्याकोणकपालेषु क्लीं श्रीं च विलिखेन्मुने हुं वीजं प्रतिकोणाग्र केशराग्रेषु च स्वरान् मालामंत्रस्य वर्णास्तु
चत्वारिंशच्च सप्त च वर्णाः सप्तदलेष्वेव षट् षट् पंचाष्टमे दले सर्वतो वेष्टयेत्कार्यं स्तत्सर्वं च तपोधन वीज
द्वयं च विलिखेन्नरसिंहवराहयोः दिग्विदिक्ष्वपि पूर्वस्मात् भूगृहे चतुरस्रके यंत्रेस्मिन्सम्यगाराध्य भक्तिं शु
क्तिं च विंदति यद्धामध्ये लिखेन्मारं षट्कोणेष्वपि च क्रमात् मूलमंत्राक्षरेणैव संधिषु द्वंद्वं च मान्मथं मायागंडेषु

किंजल्केषु स्वराणां लेखनं भवेत् यंत्रेषु पूर्ववन्मालामंत्रो लेख्यः प्रमेणादि दशाक्षरेण संवेष्ट्य कादीनि व्यंजनानि
च दिग्विदिक्षु लिखेद्बीजं नरसिंहवराहयोः एतद्यंत्रांतरं यत्र सांगावरणमर्चयेत् सौवर्णे राजते भूर्जे लिखित्वा
र्चनमारभेत् हुं जानकीवल्लभाय स्वाहा तौ द्वौ विनिर्दिशेत् दशाक्षरो वराहस्य नृसिंहस्य मनुस्ततः क्रीं श्रीं ह्लीं ऐं
क्षयान्नमो भगवते पदं रघुनंदनायेति पदं रक्षोघ्नविशदाय च मधुरेति प्रसन्नेति वदनायेति पदं वदेत् विशेषणं पं
चमं च क्षयाद्दमिततेजसे ततो बलाय रामाय विष्णवे नम इत्यथ महामंत्रोऽयमुद्दिष्टो नृणां चिंतामणिः स्मृतः
ॐ क्लीं श्रीं सीतायै वह्निजायासीतामंत्र उदाहृतः यंत्रेस्मिन्नाममाराध्य सांगावरणमादरात् आराध्य गुटकीकृत्य
धारयेद्यंत्रमन्वहं दारिद्र्यदुःखशमनं पुत्रपौत्रप्रवर्द्धनं ऐश्वर्यकृद्वश्यकरं शत्रुसंहारकारकं विद्याप्रदं सौख्यकरं
रोगशोकनिवारणं पराभिचारकृत्येषु वज्रपंजर उच्यते किमत्र बहुनोक्तेन सर्वसिद्धिप्रदं शुभे २१ ॥ ॥
इति श्रीअगस्त्यसंहितायां नवमोऽध्यायः ९ ॥ अगस्त्य उवाच ॥ पूजाविधानं स्वामिना नारदाभिहितं वयत्
वाल्मीकये मुनींद्राय द्वारपूजादिकं यथा आकर्णय मुनिश्रेष्ठ सर्वाभीष्टफलप्रदं श्रीरामद्वारपालांगपरिवार
तयास्थिताः येस्मात्तानिह स्तोमितन्मूलामिद्धयोयतः वंदे गणपतिं भारतिलकस्वामिनं शिवं क्षेत्रपालं वधाता

ग्रं. से
११

रंविधातारमनंतरं गृहाधीशंग्हंगंगायमुनांजलदेवतां चंडप्रचंडौचतथा शंखपद्मनिधीअपि वास्तोष्पतिंद्वा
रलक्ष्मीगृहेवागधिदेवतां एताःसंपूज्यभक्त्याहंश्रीरामद्वारदेवताः महामंडूककालाग्निरुद्राभ्यांप्रणमाम्यहं
आधारशक्तिकूर्माभ्यांनागाधिपतयेतथा पृथिव्यैचतथाक्षीरसागरायनमोनमः श्वेतद्वीपायरत्नाद्रौकल्प
वृक्षायतेनमः स्वर्णमंडपायाथपुष्पकायमहाद्रितौ विमानाष्टकरत्नायसम्यक्सिंहासनायच उपरादि
त्यसंशोभिपद्मायतदनंतरं नमामिधर्मज्ञानाभ्यांवैराग्यायाग्नितःक्रमात् ऐश्वर्यायततोधर्मज्ञानाभ्यांप्र
र्वतःक्रमात् अवैराग्यायवतथानैश्वर्यायनमोनमः अर्कमंडलायाथउपर्युपरिसर्वदा ओंचंद्रमंडलाये
ति ध्यात्वाध्यात्वानमाम्यहं ओंअग्निमंडलायेति संपूज्यैवंप्रयत्नतः सत्त्वायरजसेनित्यंतमसेपिनमोनमः
आत्मांतरात्मपरमात्मज्ञानात्मनेतथा प्रणवादि ``` नेनयज्ञेन्मध्येविशुध्यति विमलोत्कर्षिणीज्ञानाक्रि
यायोगाभ्यस्त्वपि नमामिप्रह्वीसत्यामीशानायैदलांतरे पूर्वादितानुग्रहायैप्रणमामितदंतरे नमोभगव
तेतद्वद्विस्वैतदनंतरं सर्वभूतात्मनेचेतिवासुदेवायस्त्वपि ततःसर्वात्मसंयोगपद्मपीठात्मनेनमः य
ज्ञामहेश्ववामांक्रीमात्मनासंप्रवस्थितौ नमोनंतायचरामायससीतायनमोनमः सान्निध्याधारयोगेननिय

११

तेनषडाननो ऽवस्थितायरामायनमोऽयंतायवह्नये श्रीबीजायपिसीतायैस्वाहांतोयंषडक्षरः तदेतन्मंत्र
रूपायरामायज्योतिषेनमः साम्बस्वारस्वरांतायवह्नयेह्रदयायनम नमश्चैवेश्वरांतायस्वरांतायक्रमानवे शि
रसेप्यग्नयेचांतः शिखायैवषडात्मने एवंनमःषडंगात्मरामायज्योतिषेनमः आत्मांतरात्मपरमज्ञानात्मभ्यो
ऽन्नितःक्रमात् निवृत्त्यैवप्रतिष्ठायैविद्यायैतेनमाम्यहं शांत्यैचात्मादिशक्तित्वेस्थितैतद्रूपिणोनमः वासुदेवाय
तेनित्यंतथासंकर्षणायच प्रद्युम्नायानिरुद्धायश्रियैशांत्यैनमोनमः प्रीत्यैरत्यैनमोरामद्वितीयावरणात्म
ने अग्रेहनूमानसुग्रीवोभरतश्चविभीषणः लक्ष्मणोऽङ्गदश्चैवशत्रुघ्नोजांबवांस्तथा धृष्टिर्जयंतोविजयःसु
राष्ट्रोराष्ट्रवर्द्धनः अकोपोधर्मपालश्चसुमंत्रश्चाष्टमंत्रिणः एतेभ्योरामरूपेभ्योऽष्टभ्यःप्रणमाम्यहं इंद्रादियम
देवेभ्यः साग्रयेभ्योनमोनमः वायवेदनदायाथरुद्रायेशायतेनमः ब्रह्मणेनंतरूपायदिक्पालायात्मनेनमः
तदायुधायवज्रायशक्तयेदंडकायच नमःखड्गायपाशायध्वजायचगदात्मने त्रिशूलायांबुजायायचक्रायसत
तेनमः वसिष्ठोवामदेवश्चजाबालिर्गौतमस्तथा भरद्वाजकौशिकश्चवाल्मीकिर्नारदस्तथा एतेभ्योरामरू
पेभ्योऽष्टभ्यःप्रणमाम्यहं नलंनीलंचगवयंगवाक्षंगंधमादनं स्वरभिश्चापिमेंदंबहिविधंचयजेत्क्रमा
त् शंखचक्रगदापद्मशार्ङ्गबाणायुधात्मने गरुत्मतेनमस्तभ्यंविष्वक्सेनादिकायचे सर्वैश्वर्यस्वरूपाय।

ज्योतिषे सततं नमः मनोवाक्कायजनितं कर्म यच्च शुभाशुभं तत्सर्वं प्रीतये भूयान्नमो रामाघशार्ङ्गिणे एतद्रहस्यं सततं
प्रत्यूषसि समाहितः यः पठेन्नाममाहात्म्यं विधेयस्यान्निधिर्भवेत् विनाशयेदसौ भाग्यं दारिद्र्यं च निकृन्तयेत् उ
पद्रवांश्च शमयेत्सर्वलोकं वशं नयेत् यः पठेत्प्रातरुत्थाय ब्रह्मार्पणधियान्वहं सयाति शाश्वतं ब्रह्म पुनरावृत्ति
दुर्लभं नारदीयमिदं स्तोत्रं स्मृतीक्ष्णाशुनिसत्तम पठितव्यं प्रयत्नेन रामार्चनपरायणैः गणपत्यादयैः सर्वैर्द्वारांग
ह्वतिरूपिणः श्रवणादिनमोन्तेनंचतुर्थ्यास्वस्वनामभिः उपचारैः षोडशभिस्तथैकादशभिर्द्विने पंचभिर्वा प्रयत्ने
न स्वस्वशक्त्यनुसारतः गणपत्यादयो ह्येते पूजिताः पूजयंत्यपि ४४ ॥ इतिश्रीअगस्त्यसंहितायां दशमोऽध्या
यः ॥ १० ॥ अगस्त्य उवाच शरीरं शोधयेदादावधिकार्थार्थमन्वहं तीर्थावगाहनं वाह्ये अंतर्भूतविशोधनं
मातृकान्यासयोगश्च शोधयेद्विध्यनुत्तितः पूजाद्रव्याणि च ततः शोधयेत्प्रोक्षणादिभिः पूजापात्राणि शंखं च शोध
येत्क्षालनादिभिः शुद्धैश्च शुद्धद्रव्यैश्च पूजयेत्पुरुषोत्तमं एवमाराधितो देवः सम्यगाराधितो भवेत् न चेन्निरर्थकं स
र्वं सिंधुसैकतहृष्टिवत् शौचाचमनविहीनस्य स्नानसंध्यादिकाः क्रियाः निःफलं स्युर्यथा चैतदंतरेण भवेत्तथा
संशोध्य पूजाद्रव्याणि स्वस्यापि बहिरंतरं शंखं च पूजयेत्सर्वं पूज्यं पूज्यार्हतां व्रजेत् पूजकस्याथ पूजास्यात्पावन
स्य कृतं तथा अपावनान्यपूजनानि साधनानि विवर्जयेत् अतः स्नात्वा प्रकुर्वीत भूतशुद्धिं विधाय च विन्यस्य मातृ

12

कार्यंवैसर्वविधिवत्स्नाने विधायतन्न्यासंतन्मूर्तिपंजरंतथा तदृषिश्छंदसोर्न्यासस्तथातन्मंत्रदेवतं विन्य
स्यैवंषडंगानितन्मंत्रबीजाक्षराणिच अतोथादेवताध्यानंततःपूजनमंततः ततोनिवेद्यतत्सर्वंजपेन्मंत्रमनन्य
धीः ततोविज्ञाप्यदेवेशंसपरिवारांश्चपूजयेत् एवंसंपूजितोदेवःसर्वान्कामान्प्रयच्छति बाह्यपूजांततःकुर्याद्दै
हिकाभ्युदयायवैः विलिख्यवेदिकामध्येमंडलंतत्रकारयेत् शालितंडुलचूर्णैश्चनीलपीतैःसितासितैः लिखेद
ष्टदलंपद्मंचतुरस्रंसमावृतं षट्कोणकर्णिकामध्येकोणाग्रेष्वन्नमुत्तमं साध्यमेवततःशोभारेखाभिरुपशोभितं
संपूज्यमंडलंचैवतत्रसिंहासनंन्यसेत् चंद्रातपपताकैश्चतोरणैरपिसर्वतः विचित्रंतत्रतत्रापिभित्तिस्तंभगृहादिषु
एवंसंशोभितस्थानेसर्वमंगलसंभृते पुण्यस्त्रीभिर्हृष्टैश्चपरितोव्यवहर्तृभिः गायद्भिरपिनृत्यद्भिर्वदद्भिः
स्तुतिपूर्वकं भेरीमृदंगवंशादिकांस्यतालादिभिर्बहुः वादयद्भिश्चबहुधासम्यगाराधितोयदि रघुनाथःस्वयं
तत्रप्रसन्नोभगवान्भवेत् संपाद्यविविधैःपुष्पैः पूरयेत्पुष्पांजलिका तुलसीपद्मजात्याद्यैर्माल्यैर्बहुविधैरपि स्वपु
रोदक्षिणातीर्थपुण्यवारिसंपूरितं कलशंस्वपुरोगायायभोगेषुविनियोजयेत् अन्यानिपूजाद्रव्याणिपुरस्ताद्देवनिः
क्षिपेत् आराधनायदेवस्यवेदिकाधःस्वासने कुशाजिनतृणवैयाघ्रचर्मवासोविनिर्मिते उपविश्यशुचिर्भोगी
भूत्वापूजांसमाचरेत् तथामलकमालांचसम्यक्पुष्करमालिकां निर्माल्यतुलसीमालांशिरस्यपिनिधायवै निर्मा

13

स्वचंदनेनांगानामंकयेत्तस्य नामभिः तस्मात्पुण्यानि बाहुल्यास्तु तेनैव द्विजसत्तम पापिष्ठो चाप्यपापिष्ठः सर्वज्ञोप्यज्ञ
एव वा भवेद्देवाधिकार्यत्र पूजाकर्मण्येष सदा स्वस्तिकभद्रादिरूपेणांभोजपद्मं विनायकं नमस्कृत्य
सव्यांशे च सरस्वती दक्षिणांशे पूर्ववत् गुरुं गां चैव अपि पुनः ॐ मस्त्राय फट् प्रोक्त्वा भ्रामयेद्दक्षिणं करं ततस्तु चिंतयेदं
तर्देवस्यान्तर्यांतरे ज्योतिर्मयमनस्यंतं सत्यज्ञानसुखात्मकं आत्मनः परितो वह्निप्राकारं त्राणनाय च भूतप्रेतपि
शाचानां विधाय तदनंतरं अद्भिः प्रक्षाल्य तैश्चैव वह्निबीजास्त्रमंत्रितैः अलिपेत्परितो मंत्री भयविघ्ननिवृत्तये एवं
हृज्जे ब्रह्मकंदसंभूते ज्ञाननालके आराध्यमानो जीवस्तु चिंतनीयो मनीषिभिः नेतव्यो हंसमंत्रेण द्वादशांते स्थितः
परः तेन संयोज्य विधिवद्भूतशुद्धिमथाचरेत् भूतानि नाम पृथिवी जलं तेजो वियन्मरुत् यद्यतो जायते तस्मि
न्प्रलयोत्पाद[illegible]नं पुनः जीवेन पुनरात्मानं चिंतयेत्तत्स्वरूपामये जीवस्य तत्त्वमसिद्धो शरीराकारभूतानां भूतानां
शोधनं पुनः मरुदग्निसुधाबीजैः पंचाशत्मातृका प्राणान्निरुध्यात्मदेहं शोषयेत्तत्पुनर्दहेत् तद्देहं पु
नराप्लाव्य पुनर्जीवं निजस्थानं नयेत् जीवेन पुनरात्मानं चिंतयेत्तत्स्वरूपामये जीवस्य तत्त्वमसिद्धो च तस्याप्यात्मत्वसिद्धये
नयनानयनार्थं च हंसः सोहमितीरयेत् भूतशुद्धिरियं नाम कर्तव्या नाम सार्थकृत् भूतशुद्धिं विनायस्य जपहोमादि
काः क्रियाः भवंति निःफलाः सर्वाः प्रकारेण प्रतिष्ठिताः गृहोपसर्पणं चैव तथान्यागमनं हरेः भक्त्या प्रदक्षिणं चैव वा १३

दयोः शोधनं विदुः पूजार्थं यत्र पुष्पाणां भक्त्यैवोत्तोलनं हरेः करयोः सर्वशुद्धीनामियं शुद्धिरुदाहृता यन्नामकी
र्तनं चैव गुणानामपि कीर्तनं भक्त्या श्रीरामचंद्रस्य वचसः शुद्धिरिष्यते तत्कथाश्रवणं चैव तस्योत्सवनिरीक्षणं
श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते पादोदकस्य निर्माल्यमालानामपि धारणं उच्यते शिरसः शुद्धिः प्रणत
स्य हरेस्तु नः आघ्राणं गंधपुष्पादेरर्चितस्य तपोधन विशुद्धिः स्यादनंतस्य घ्राणस्यैवाभिधीयते पत्रपुष्पादिकं
यद्यद्रामपादयुगार्पितं विशुद्धये भवत्येव स्वात्मना धार्यते यदि अन्नपानाद्यथवा सर्वं यद्यद्धि समर्पितम्
तदेव पावनं लोके तद्धि सर्वं विशोधयेत् ॥ ५२ ॥ इति श्री अगस्तिसंहितायामेकादशोऽध्यायः ११
अगस्त्य उवाच अथातो मातृकान्यासक्रमोत्रापरिपद्यते नियम्यास्य ऋषिर्ब्रह्मछंदो देवताबीजयोषितः शिरोवद
नहृद्गुह्यपादेषु न्यास उच्यते करांगुलीनां रेखासु स्वरैकैकंशविन्यसेत् विन्यसेत्प्रणवं पाणिः तलयोः पृष्ठयो
रपि ह्रस्वं दीर्घस्वरांतायाः कादयः पंचपंचकाः क्रमस्थाद्यंतयोर्यादिलांतश्च दशवर्णकः अंगुष्ठाद्यंगुलीनां च त
थैव तलपृष्ठयोः न्यासस्ततः षडंगानां भवत्येवं प्रकल्पना हृदि मूर्ध्नि शिखायां च सर्वांगे नेत्रयोरपि दिक्षु हुं च
नमः स्वाहा वषट् हूं वौषडप्यथ तथास्त्रायाफडित्येव षडंगानां च पल्लवं तत्रस्थाने चतुर्थ्यंते तत्तत्पल्लवयो
गतः तत्तदंगगतो न्यासस्तत्तत्स्थानेषु शस्यते अथांतर्मातृकान्यासः कंठहृन्नाभिगुह्यके पायौ भ्रूमध्यके पद्मे षोड

ग्र॰ सं
१४

14

षोडशादशाष्टदले दशपत्रे च षट्पत्रे चतुष्पत्रे द्विपत्रके पंचाशद्वर्णविन्यासः पत्रसंख्याक्रमाद्भवेत् एकैकवर्णमेकैक
पत्रांते विन्यसेन्मुने एवमंतः प्रविन्यस्य मनसा तान्बहिर्न्यसेत् शिरोवदनहृन्नेत्रं च चक्षुः श्रोत्रयुगे तथा नासाकपो-
लयुगलेन तथोष्ठाधरयोरपि ऊर्ध्वाधोदंतपंक्त्योश्च मूर्ध्नि आस्ये षोडश स्वरान् कचवर्गद्वयं बाह्वोः पंचसंधितले न्यसेत्
टतवर्गद्वयं पादसंध्यग्रेष्वपि तथा न्यसेत् पवर्गं पार्श्वयुगलपृष्ठनाभ्युदरेषु च हृदोमूलककुत्कक्षिहृदादिकरपद-
ये जठराननयोश्चैव व्यापकं विनियोजयेत् पंचाशद्वर्णन्यासः क्रमेणैव विधीयते ओंमाद्यं तेन मोंतोम बिंदुबिंदुवि-
वर्जितः मायालक्ष्मीकामबीजपूर्वो न्यासस्त्वयमुच्यते केशवाय च कीर्त्यै च तथा नारायणाय च कांत्यै तथा माधवाय
तुष्ट्यै नम इति न्यसेत् गोविंदाय च पुष्ट्यै च विष्णवे धृत्यै वदेत्ततः मधुसूदनाय शांत्यै त्रिविक्रमाय क्रियायै वामनाय
दयायै च श्रीधराय वदेत्तथा मेधायै हृषीकेशाय हर्षायै च नमस्तथा पद्मनाभाय श्रद्धायै तथा दामोदराय च लज्जायै न-
मस्तु क्रं वासुदेवाय चैव हि लक्ष्म्यै नमस्तु संकर्षणाय वदेत्ततः सरस्वत्यै प्रद्युम्नाय रत्यै प्रीत्यै इतीरयेत् अनि-
रुद्धाय रत्यै च त्वेवांते प्रवदेदथ चक्रिणे विजयायै च शार्ङ्गिणे गदिने तथा दुर्गायै च प्रभायै च खड्गिने विन्यसेदथ स-
त्यायै शंखिने चैव चंडायै च नमस्तथा हलिने च तथा वाण्यै नमो मुशलिने वदेत् विलासिन्यै शूलिने च विजयायै तथा दं-
तं पाशिने विरजायै च तथा चांकुशिने वदेत् विश्वायै च मुकुंदाय विनदायै नमस्तथा नंदजाय सुनंदायै नंदिने स्मृतयेन

मः नरायकृष्णैतद्वत्तन्नारकन्नेनतथावदेत् समक्षेहरयेकृष्णैकसायचभुक्तेतथा सत्वायब्रह्मसात्वतायमत्स्यैनम
इतीरयेत् गौर्यैचक्षमायैचशूरायचरमायैनमः जनार्दनायचोमायैततःशार्ङ्गधरायच क्रोधिन्यैविश्वमूर्तयेक्रि-
यायैतदनंतरं वैकुंठायनमस्तद्वद्वसुदायैनमस्तथा पुरुषोत्तमायवसुधायैपरायैवलिनेतथा बालाकुजायपरा-
यणायैनमइतीरयेत् वलायवदस्वलायैसंध्यायैचवृषघ्नते वृषायचप्रज्ञायैहंसायैप्रभायैतथा वाराहायैनिशायै
चविमलायवदेत्ततः अमोघायैनमस्तद्वन्नरसिंहायविद्युते क्रमेणकामवीजंचमातृकाक्षरपूर्वकं एकंदैवंतथा
शक्तिरेकंनमइतिक्रमः केशवंचापिकीर्तिंचनमोंतेविन्यसेत्सुधीः शिरोवदनहृन्नादिस्थानेष्वेवंविधिःस्मृतः ओंका-
रमारवीजंचमातृकाक्षरपूर्वकं एकंदैवंतथाशक्तिरेकंनमइतिक्रमः केशवादिरयंन्यासोन्यासमात्रेणदेहिनां
अच्युतत्वंददात्येवसत्यंसत्यंनसंशयः इतीत्थंतत्त्ववन्यासमितथान्यासमतःशृणु यन्नत्वन्यासमात्रेणतन्मयमेव
प्रजायते यादयःप्रतिलोमेनकान्ताःस्युःसर्वसंज्ञकाः नमःपरायसर्वेत्रप्रणवांतेव्यवस्थिताः जीवःप्राणश्चबुद्धि
श्चाप्यहंकारोनमस्तथा सर्वांगेहृदिविन्यस्यश्रोत्रादीनींद्रियाण्यपि मूर्ध्निप्राणेचहृदयेगुह्येपादयोरपि
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपादिदेहिनां ज्ञानेंद्रियाणिपंचापितत्तत्स्थानेन्यसेत्सुधीः वाक्पाणिपादपायूपस्थक
रसज्ञानिह्युपस्थके तथैवतत्तत्स्थानेशुभत्तदेवप्रविन्यसेत् शिरोमुखेचहृदयेतथागुह्येपिपादयोः आकाशा-

निलतेजांसिसलिलंपृथिवींतथा विन्यसेत्पूर्ववच्चैवन्यासवह्निरुदीरितं शाहोसैरामवोवापियक्षराजवलाअपि
दैांचेतिदशवर्णाचप्राणावांतेचपूर्ववत् ह्रतमसोमसूर्याग्निस्वकलाष्टकमंडले त्रयंह्रद्येवविन्यस्यवासुदेवाद
यस्तथा परमेष्ठीचपुरुषोविश्वस्यापिनिवृत्तिकाः नारायणोन्तसिंहश्चसर्वकोपास्यपूर्वकौ मूर्ध्नास्येह्रदिगुह्ये
चपादयोर्व्यापकंततः तदात्मनेनमइतितत्रस्थानेन्यसेत्ततः अतस्तस्याप्यपूज्यस्यतन्मात्रेदैवतेनाततः
त्वयान्यासमितिप्राहुर्न्यासतत्वविदोजनाः यःकुर्यात्मतत्वन्यासंसएवभवतिध्रुवं तदात्मनात्रप्रविश्यभगवानि
हतिष्ठति यतःसएवसत्वानिसर्वंतस्मिन्प्रतिष्ठितं तन्मूर्तिपंजरंन्यासस्तस्यतन्मूर्तिसिद्धये आकर्णायेकचित्तः
सन्यतोस्तिनफलांतरं नमोभगवतेद्वयाद्वासुदेवायइत्यपि ॐमाटेवस्यमंत्रस्यआदायैकान्तरंततः एकैकमन्तरं
तद्वन्क्लीरामाख्यमनोरपि द्विरावृत्यान्तरादानंविष्णोर्दशसुनामसु नामैकैकशुपादायमूर्तयस्यापिचनामसु ॐततः
स्वास्तद्वद्वासुदेवान्तरंततः श्रीराममंत्रवर्णास्तुततःस्युःकेशवादयः धात्रादयोनमोंतायमूर्तयस्यापिचनामसुन्यां
स्तथान्यासयोगतः ललाटनाभिह्रदयंकंठपार्श्वांसकंधरे पार्श्वांतरांसेस्कंधेचपृष्ठेककुद्दिचक्रमात् केशवंचनतो
द्वयान्नारायणइतिस्वयं माधवश्चैवगोविंदोविष्णुश्चमधुसूदनः त्रिविक्रमोवामनश्चश्रीधरोनवमःस्मृतः हृषी
केशःपद्मनाभःतथादामोदरःप्रभुः विष्णोर्द्वादशनामानिचेमानिमुनिसत्तम धाताऽर्यमाचमित्रश्चवरुणांशोभग

स्तथा विवस्वानिंद्रश्च पूषा च पर्जन्यो दशमः स्मृतः त्वष्टा च विष्णुरेतानि नामानि द्वादशात्मनः तन्मूर्तिपंजरन्यासोऽभि
हितः परमेष्ठिना शिरोभ्रूमध्यहृदयेनाभिगुह्यपदस्तने मूलमंत्राक्षरान्न्यासं षडंगमपि विन्यसेत् एवं विन्यस्य
विधिवत्साक्षान्नारायणो भवेत् ज्वररोगाभिचाराद्याः प्रलयं यांति नान्यथा भूतप्रेतपिशाचाश्च तथैव ब्रह्मराक्षसाः
कूष्मांडाश्चैव डाकिन्यो नैव दृष्टुमपि क्षमं य एवं विन्यसेद्धीमान्रामः साक्षात्स्वयं भवेत् नातः परतरं किंचित्पावनं पुण्य
मस्ति हि ॥ ८४ इति श्रीअगस्त्यसंहितायां द्वादशोऽध्यायः ॥ १२ ॥ अगस्त्य उवाच स्नातीक्षापात्राण्यासाद्य
ततः पूजार्थमादरात् शांखमहेमसंशोध्य सदाधारे निधाय च पूजयेदग्निसूर्येंदुवीजैः सत्त्वफलान्वितैः तत्तत्कला
नां संख्याभिर्दशद्वादशषोडशाः आधारशंखतीर्थेषु तत्तद्दात्मानमर्चयेत् तीर्थावाहनमंत्रैश्च तीर्थान्यावाह्य पूज
येत् गंधपुष्पाक्षतैर्धूपैर्दीपाद्यैरपि भक्तितः शंखमुद्रां चक्रमुद्रां च गारुडाख्यां प्रदर्शयेत् परमीकृत्य यत्नेन पावनं त
द्विचिंतयेत् देवस्य मूर्ध्नि तत्सिंचेत्पूजाद्रव्येषु चात्मनः अवेक्षणं प्रोक्षणं च वीक्षणं ताडनं तथा अर्चनं चैव सर्वेषां पा
वनत्वं प्रकल्पयेत् एतमेवाखिलं पूजायोग्यं भवति साधनं अर्घ्यपात्रे प्रदानार्थं मधुपर्कार्थमप्यथ तथैवाचमनार्थं च
न्यसेत्पात्रचतुष्टयं आत्मनः पुरतः शंखं पूर्ववत्साधयेत्ततः अर्घ्यपात्रे पाद्यपात्रे संपूज्य सलिलं शुभं तत्रार्घ्यपात्रे दा
तव्याः गंधपुष्पाक्षता यवाः कुशाग्रतिलदूर्वाश्च सर्षपाश्चार्थसिद्धये पाद्यपात्रेपि दातव्यं श्यामाकं दूर्वमेव च अब्जं च वि

ग्र॰ सं स्वक्रांतां च पाद्यसिद्धौ प्रयोजयेत् तथाचमनमात्रेपि दद्याज्जातीफलं मुने लवंगमपि कक्कोलं शस्तमाचमनी
१९ यकं दद्याच्च मधुसर्पिर्भ्यां मधुपर्को भविष्यति स्नानपुरुषसूक्तेन शुद्धशीतोदकेन च क्षीरदध्याज्यमधुभिः खं
डेन च पृथक्पृथक् नालिकेरोदकेनापि तथा तालफलोद्भवैः गंधद्रव्यैस्सुबहुभिस्तथा गंधोदकेन च एलवेनो
दकेनापि सकर्पूरादिगंधिता शतं सहस्रमष्टौ तं शक्त्यावाप्यभिषेचयेत् शांतं संपूर्यते नैव सहस्रेणायुतेन मम
16 सकृत्सागरुधूपेन धूपयेदंतरांतरा ततः शुद्धजलेनैव स्नापयेतमनन्यधीः राज्यार्थी राज्यसिद्ध्यर्थं नित्यं वत्सरा
मादरात् एवमेवाभिषेकैश्च राजा भवति नान्यथा दत्वाप्याचमनीयं च वाससी परिधापयेत् ततो भूषणदानं च
सोत्तरीयेन वाससा यज्ञोपवीतं दत्वा च दद्याच्चंदनमादरात् पुष्पाणि गंधमाल्यानि विविधानि समर्पयेत् धूपं
दीपं च नैवेद्यं तांबूलं च प्रदक्षिणं नमस्कारं च पूजायामुपचारास्तु षोडश आवाहनादिकास्त्वेते तथैकादश पंच च
भवंत्येवोपचारैस्तैः पूजां कुर्यादहर्निशं वाद्यैरपि च गंधाद्यैः शक्त्या भक्त्या प्रकल्पितैः द्वारपीठमथादावभ्य
र्च्यैवं पुरस्ततः राममाराध्य विधिना सर्वैरप्युपचारकैः अष्टांगावरणं देवाः संपूज्याप्यायुधानि च एवं सम्यक्स
माराध्य सांगावरणवाहनं स्तोतव्यमतियत्नेन रामः सम्यक्प्रणम्य च यंत्रस्याप्यपि मंत्रैश्च सम्यक्पूज्या प्रयत्नतः
एवमेव यजेद्दर्भे होमादावपि राघवं तर्पणादावपि जलेष्वेवमाराध्य तर्पयेत् शालग्रामशिलायां च तुलसी

तुलसीदलकल्पिता पूजाश्रीरामचंद्रस्यकोटिकोटिगुणाधिका प्रतिमायांच ···· भूमावग्नौविवस्वति जलेवा
हृदयेवापिविधायाद्य ···· कीलेचैपोपचाराणांपूजयेत्तुलसीदलैः घंटांचवादयेद्दद्याद्देवायाचमनी
यकं मध्येमध्येचतत्तच्चनत्वानत्वासमर्पयेत् सुकुलैः पतितैश्चैवखंडितैश्शीर्णितैरपि अनर्हैरपिपुष्पैस्तद्दलैः
पत्रैश्चनार्चयेत् येनकेनापिपुष्पेण पत्रेणाथदलेनवा यतःकुतश्चिदानीयपत्रकुशोद्भवेनवा भवार्थंजीवनार्थं
चनार्चयेद्धरिंतेस्थले गंगायांगोप्रदानेनदिव्यवर्षशतत्रयं यत्फलंप्राप्यतेनित्यमाराध्याप्नोतितद्धरिं पत्रपु
ष्पफलंवापिरामाराधनसाधनं दद्यादाराधितोयेनवैतस्यपुण्यफलंशृणु कुरुक्षेत्रेचगंगायांप्रयागेपुष्करेषोत्त
मे गोसहस्रप्रदानेनयत्तत्फलमवाप्यते तदेतदखिलंप्राप्यप्राप्नोत्येवनसंशयः समग्रमसमग्रंवायोदद्यात्पूजितं
हरेःकदाचिदपिनित्यंवायोदद्यात्पूजितंबहु किंतीर्थसेवयादानैर्यज्ञैर्बहुभिरीरितैः आराधनासमर्थश्चदद्यादर्चा
नसाधनं प्रदातुंनैवशक्नोतिकुर्यादर्चनदर्शनं निस्तारायचदेवानामवाप्नोतिसत्तम नैकंचयस्यविद्येतसाधाया
त्येवनान्यथा नियमव्यतिरेकेणयःकुर्याद्देवतार्चनं किंचिदप्यस्यनफलंभस्मनीवहुतंयथा योर्चयेद्विधिव
द्भक्त्यापरानीतैश्चसाधनैः पूजाफलार्द्धमेवास्यनसमग्रफलंलभेत् यस्तुभक्त्याप्रयत्नेनस्वयंसंपाद्यचाखि
लं साधनंचार्चयेद्विद्वान्ससमग्रफलंलभेत् परारोपितवृक्षेभ्यःपुष्पाण्यानीयचार्चयेत् तत्तन्मूल्यांतराण्येव

अ॰ सं
१७

17

दर्शयेच्चैवसादरं प्रासादमग्रतोकृत्यसंनिधाप्यचपूजयेत् सकलीकृत्यतत्प्राणास्तदामीमिंद्रियाण्यपि यद्येवं
पूजयेद्रामंभुक्तिंमुक्तिंचविंदति ५१ ॥ इतिश्रीअगस्तिसंहितायांत्रयोदशोध्यायः १३ ॥ अगस्त्यउवाच
विधिवत्संस्कृतेप्यग्नौदेवमावाह्यपूजयेत् पूर्वोक्तेनैवविधिनाप्यांगावरणावाहनं विधिंतस्यप्रवक्ष्यामियेने
ष्टंसाध्यतेफलं विहितंयेनतिष्ठतितएवफलभाजनाः सर्वेषामीप्सितानांचअन्यथाचेत्तथानहि न्यायार्जि
तैःसाधनैश्चदानहोमार्चनादिकं कुर्यामवेदयोयातिमंत्रार्णवमपिद्विजः भूमिस्थानंसमीकृत्यषट्चतुष्कांग
लांतरं तावन्निखनेदंतचतुष्कोणंतथात्ततः दिशिदिक्षुपंतरेचैवपार्श्वस्थलचतुष्टयं एवंसलक्षणंकृत्वावहिः
कुर्याच्चमेखलां द्वादशाष्टचतुर्म्मानांस्वांगुलैश्चक्रमात्तने एवमुत्सेधमायामचतुरंगुलमेवतत् आयामोत्सेध
रूपेणचतुष्काधिकयतःक्रमात् चतुष्कत्रितयंकुर्यादेवंस्यान्मेखलाक्रमः कुंडस्यपश्चिमेभागेयोनिंकुर्यात्सलक्ष
णां अश्वत्थपत्रसदृशींकुंडेकिंचिन्नतिष्ठितां षट्चतुरंगुलासाचक्रमान्निम्नाभवेत्पुनः विस्तारेणापिसायोनि
र्भवत्येवंदशांगुला मूलेनालंतथाग्रेचव्युत्क्रमात्षट्चतुस्त्रिकं तन्मानांगुलिमानस्यात्तदेतत्कुंडलक्षणम्
एकहस्तस्यकुंडस्यप्रकारोयंप्रदर्शितः द्विहस्तकुंडमप्येवंद्विगुणीकृत्यमेखलां नाभिरप्यथवाकुंडमेकमे
खलकंभवेत् संक्षेपकर्मसुतथावर्तुलस्यापिलक्षणं चतुष्कोणैकहस्तस्यमध्येकुंडलांछनं समनिधाय

सूत्रेणभ्रामयेदभितोमुने कोणेषुयदासंस्थाप्यपिकंतद्धित्र्येवविनिर्दिशेत् इदंत्ववर्तुलंकुंडंततःस्यादर्द्धचं
द्रकं दिशिचोत्तरतःकुंडपाणिभागार्द्धभागतः बहिर्वैर्भ्रामयेद्वाणायायत्नामध्येतलांछयेत् संस्थाप्यभ्राम
येदेतदर्द्धचंद्रंशुभप्रदं मेखलास्वष्टपत्राणिवर्तुलस्यतयोनिधे पद्माकारंभवेदेतत्कुंडंसर्वफलप्रदं शत
होमेरत्निमात्रेतदर्द्धंमुष्टिसम्मितं सहस्रेप्ययुतेप्येवंलक्षेलक्षेपिचक्रमात् पंचपंचांगुलाधिक्याद्वर्द्धनेरत्निमा
त्रतः कुंडंचकोटिहोमेपितदर्द्धंपिकषाष्टकं मुष्टिरत्निमितेतत्तद्दशाद्वादशषोडश तत्क्रमेणांगुलीनांचप्र
थमामेखलाभवेत् द्वितीयेचतृतीयेचत्र्यंशेत्र्यंशेविनिर्दिशेत् सर्वेषामपिकुंडानामंगुलिद्वयवृद्धितः प्रथ
मामेखलाकार्यात्र्यंशेप्यन्यात्पूर्ववत् कंठोष्टयवमात्रःस्यात्कुंडेचकरमात्रके कुंडेषट्यवमात्रःस्यात्कंठोरत्निप्र
माणके तथाचतुर्थ्यैवैःकंठोमुष्टिमात्रेविनिर्दिशेत् सर्वेषामपिकुंडानामंगुलिद्वयवृद्धितः प्रथमामेखलाका
र्यात्र्यंशेप्यन्यात्पूर्ववत् कंठोष्टयवमात्रःस्यात्कंठोरत्निप्रमाणके तथाचतुर्यवैःकंठोमुष्टिमात्रेविनिर्दिशेत्
सर्वेषुकुंडमानेषुअंगुलिद्वयवृद्धितः कंठोयत्नेनकर्तव्योभुक्तिमुक्तिफलेप्सुभिः सात्त्विकीराजसीचैवतामसीच
क्रमाद्भवेत् प्रथमाचद्वितीयैचतृतीयाचक्रमाद्भवेत् प्रथमाचद्वितीयाचतृतीयाचक्रमाद्भवेत् योन्यकुंडानु
सारेणऊर्ध्वादायंतमध्यतः उक्तांगुलिप्रमाणेनद्विगुणांचचतुर्गुणां होमसंख्यानविधिनासर्वलक्षणलक्षितं

अ. सं ९ एवं वा कुम्भमात्रेण होमार्थं विदधीत वै चतुरस्रं विदध्यादौ समं पंचांगुलक्रमात् तृतीयांशेन वर्तुलः स्यात्तदन्तर्विनि
संमितं खात्वा समं तिर्यगूर्ध्वं तदधः शोधयेद्बहिः चतुर्थांशं चांगुलस्यैरेखात्रयं ततः ततः रम्यां च मेखलां तस्य शि
ष्टेनार्द्धेन कारयेत् कुर्याद्विभागविस्तारां मंगलेन समाहृतां सार्द्धमंगुष्ठकं वा स्यात्तदर्धं त्र्यंगुलं भवेत् चतुरंगुल
विस्तारं पंचांगुलमथापि वा वितस्त्यंगुलकं तस्य मध्यान्ते तत्र शोभनं शुषिरं कुम्भदेशे स्याद्द्विशो यावत्कनीयसी शो
भं कुण्डं तत्कर्तव्यं यथारुचि विचित्रिकं चतुःकोणसमायुक्तो हस्तमात्रः स्रुचो भवेत् अष्टकं शोभनं हस्तं द्व्यंगुलं विदधी
त वै यथाल्पं केतोः पादं रुचिरं दृश्यते यथा पलाशपत्रैर्निःच्छिद्रैः रुचिरैस्तु कस्तु वैवासने विदध्याद्द्वाश्यपत्रे संति
ने होमकर्मणि ततः कुण्डस्थलं सम्यक् वायव्ये विदधीत वै तत्राष्टपत्रकमलं हस्तत्रयपरिहतं सोमसूर्याग्निविवेक
तथा कुर्याद्विचक्षणः चतुरस्रं बहिस्तस्य षट्कोणं कर्णिकान्तरे पीतं पूर्वं सितं देयं पश्चिमे पुनरेव तथा रक्तं तद
त्तिणे कुर्यात् पाटलं वह्निसंस्थिते नैरृते नीलवर्णं तु वायव्ये मिश्रवर्णकं एषो गौरं विनिर्दिष्टमष्टपत्रेषु यं क्रमः शंखं
चक्रं गदां पद्मं च धत्र्यं वर्णाश्च मण्डले विलिखेद्वर्णकैः सम्यक् तत्र रामं समर्चयेत् कुण्डान्तरे एवमेव आराध्य जुहुयान्मुने
आदौ वह्निं गर्भे कुर्यात् कुण्डे पविष्टः सुविष्टरे प्राणानायम्य मनसा जपेन्मंत्रमनन्यधीः यावन्मरुत्संचरति सर्वांगेषु
पि निश्चलः संकल्प स्थंडिले कुण्डे कृत्वा लेखाश्च मध्यतः ऊर्ध्वं तिर्यक् तिस्र एवं वह्निमंत्रादधीत वै प्रोक्षणोपसार्यत

18

तस्मात्कृत्वा विष्टरमादरात् लक्ष्मीं ऋतुमतीं तत्र प्रभोर्नारायणस्य च धाम्नि धर्मेण संजातमग्निं तत्र विचिंतयेत् अम
थ्यविधिनैवाग्निमाहिताग्नेर्गृहादपि आनीय चादधीत तत्र कुशैः प्रज्वालयत्ततः संधेत्यथाग्निकैः काष्ठैः पुनः प्रज्वाल
येदपि प्राणायामं ततः कुर्यात्परिस्तीर्य कुशांकुरैः स्वगृह्योक्तविधानेन वासुदेवादिभिर्युते पात्राण्यासाद्य विधिवत्
द्विधा मंत्रेण तंत्रवित् तान्यवीतपवित्रेण चोक्षणानि विधानि च पुनः प्रोक्षणीयेत्पात्रे पवित्रे दर्भयुग्मभांडुना दत्वा त
त्वान्यवित्रं च ततोन्यविविधानि च दिश पूर्वस्यां तत्पात्रं प्रणीतेत्युच्यते बुधैः तत्रार्चयेत्प्रभुं विश्वं ब्रह्माणं वार्कमर्चये
त् आज्यसंस्कृत्य विधिवत्स्वसंपन्नमिति ब्रुवन् गर्भदानादिकं वह्नेर्विवाहांतं समाचरेत् प्रणवेनैव चतरणे प्रत्येकैक
स्यात्कर्मणः जुहुयाद्दर्विते वह्नौ वौषडंतं समाप्य च कर्मांतरे समारभ्य तदंते च समापयेत् एवमग्नौ स्वसंपन्ने देव
सर्वं जुहुयात्प्रभुं इध्माधानाद्यग्निमुखात् आज्यभागौ जुहुयात्पुनः संगावाहनमंत्राभ्यां पूजयेद्भुवनंदनं समिदाज्यच
राणां च प्रत्येकं षोडशाहुतिः जुहुयान्मूलमंत्रेण परिवारेभ्य एव च तिस्रो विनायकादिभ्यः सर्वेभ्याप्याहुतीर्युने द्वारा
ण परिवारेभ्य स्वरेभ्यो जुहुयात्पुनः हुत्वाज्येनाहुतिस्तत्र वदयात्तत्र दामये ततः द्वेषस्य जुहुयात्प्रत्येकं च मनो
हरं द्वारपीठस्वरेभ्यश्च हुत्वाद्यैः जुहुयात्ततः अंगादिवैभवेभ्यश्च आज्याहुतीः पृथक्पृथक् ततः स्विष्टिकृतं हुत्वा
हुतेन पुनिस्तनम जलेन विधिना सम्यक्परिषिच्य समंततः प्रणीतामार्जनं कृत्वा दद्याच्च ब्रह्म दक्षिणां स्वस्वविताउ

अ.सं सावेणलोभमोहविवर्जितः ततोब्राह्मणान्सुहास्यब्राह्मणान्भोजयेत्ततः अग्निमध्यगतंदेवंपुनःस्वात्मनियोजयेत्
२५ एकीभूतंविचिंत्यैवंवाचयेत्स्वस्तिवाचनं आशीर्वचोभिर्विप्रैर्वर्ध्यमानःसुखीभवेत् हुतशेषंततःआज्यकु
क्कुटांडप्रमाणकं मंत्रिवामभागायध्यात्ततःतस्यैबलिंहरेत् सन्निधावपिदेवस्यबाह्यांतर्दिक्षुचांयसा नित्यनैमित्ति
केकाम्येप्येतदग्निमुखंस्मृतं सर्वत्राभ्युदयन्श्राद्धसंस्कारारोपणंतथा आदावेवप्रकुर्वीतकर्मणामभ्युदयार्थतः ॥
इतिश्रीअगस्तिसंहितायांचतुर्दशोध्यायः ॥ १४ ॥ अगस्त्यउवाच अथप्रयोगंवक्ष्यामिचतुर्णामिष्टदंमुने सं
दभागेयोपियेनष्टांवांछितंलभतेफलं विधायविधिवत्सम्यगग्निभागेनभक्तिवत् ततस्तदेवमावाह्यपूजयेदुप
चारकैः पंचभिर्वाषोडशभिःपूजोपकरणैःपृथक् पालाशाश्वत्थखदिरोडुंबराम्रवटेंधनैः अग्निंप्रज्वालयेत्सम्य
ग्याज्ञकैर्वापवेधनैः तत्रैवपूजयेत्सम्यग्लक्षंतज्जुहुयापिराघवं लक्षंतदर्धमथवाजपित्वातद्दशांशतः तिलैर्वा
कमलैर्हुत्वायद्यदिष्टंसमश्नुते बिल्वप्रसूनैरैश्वर्यमर्चितेश्रीकृतेभवेत् पालाशकुसुमैर्हुत्वामेधावीदेवविद्भवेत्
दूर्वाभिश्चगुडूचीभिः प्रत्येकमपिचाहुतैः निरामयोपिदीर्घायुर्भवत्येवतपोधन सम्यक्चंदनतोयेनप्रसूनैश्च
समुक्षितैः जातीप्रसूनैर्हुत्वातुराजानंवशमानयेत् ध्यात्वातुमन्मथंरामंसीतांचापिरतिंस्मरेत् सर्ववश्यप्रयोगे
षुजपहोमादिकर्मसु रामंनरोयथंतारंस्मरेदाराध्यभक्तितः उपैतिसद्दर्शीकन्यांलाजाहोमेनसाधकः वांछितं

19

१९

धनमाप्नोति हुत्वा रक्तोत्पलैर्नवैः हुत्वा नीलोत्पलैः सम्यक् वशयेदखिलं जगत् रामं विधिवदाराध्य ज्व(
लितेऽग्नौ प्रयोगवित् मधुरत्रययुक्तेन पायसेन गुडेन तु सर्वाधिपत्यं वैदुष्यं भवत्येव न संशयः तिलैश्च
तंडुलैराज्यैर्हुत्वा लोकस्य राजतां अथ संवत्सरं यावत् षट्सहस्रं दिने दिने जपे‥ज्जुहुयादग्नौ दशांशं च(
हुतांशसं अयमेवानदो लोके सर्वेषामेव जायते बिल्वैः प्रसूनैर्जुहुमैत तथा बिल्वफलैरपि हुत्वा स लभ
ते लक्ष्मीमचिरान्मंत्रसाधकः आराध्य रामचंद्राख्यं मंडले वत्सरं मुने उदयादस्तमानांतं जपेन्मंत्रमनन्य
धीः फलं भवति तस्याशु देवानामपि दुर्लभं वैडूःखेनाधिपत्येन सम्मानाद्युत्तमो भवेत् पूर्णिमास्वनि
शीथिस्याशुदयास्तमनं व्रतं संवत्सरं प्रकुर्वीत जपहोमादिकं विभोः रात्रौ जपेद्दिवा होमं कुर्याद्देवापरे
हनि ब्राह्मणान्भोजयित्वा तु व्रतमेतत्समापयेत् सोमसूर्यात्मकं यस्तु व्रतं कुर्वीत मानवः इह भुक्तिं(
मुक्तिं च लभते नात्र संशयः रक्तपद्मैस्त्रिबंधूकैः तथा रक्तोत्पलैरपि अभीष्टलोकवश्यार्थी जुहुयाद(
र्चितेनले राज्यैश्वर्योपभोगार्थी गिरौ सत्यमनन्यधीः पद्मैः बिल्वप्रसूनैर्वा दशांशं जुहुयान्मुने समुद्र
तीरे गोष्ठे वालतज्ञायी भवेन्नरः पायसेनाज्ययुक्तेन हुत्वा विद्यानिधिर्भवेत् पत्तीणाधिपत्यायः शा(

ग्र॰सं
२०

काहारे जलांतरे जपेल्लक्षं वज्रकृत्या द्विल्वपत्रैर्दशांशतः तदेव पुनरायाति स्वाधिपत्यं न संशयः उपोष्य गंगा
द्विजलांतरस्थो रामं समाराध्य जपेल्लक्षं हुत्वा दशांशं कमलैस्तिलैर्वा बिल्वप्रसूनैः मधुरत्रयाक्तैः राज्यः
श्रियं विंदति मंदभाग्योप्यशुभ्यदास्यं परवांछितं स्यात् राममाराध्य विधिवदर्चितेग्नौ जपेदपि सूर्यबिंबोपि
तोयस्थो वज्रकृत्या द्विल्वदंडकैः राज्यलक्ष्मीमवाप्नोति शरत्काले तपोधन वैशाखे राघवं सूर्ये पश्यन्निषेवणः
निराहारो जपेल्लक्षं मौनी पंचाग्निमध्यगः दशांशं कमलैर्हुत्वा सार्वभौमो भवेद्ध्रुवं माघमासे जले स्थित्वा कं
दमूलफलाशनः जपेल्लक्षं वज्रकृत्या पायसेनार्चिते नले दशांशं पुत्रपौत्राद्यैस्तेन क्लेषं प्राशयेत्स्वियम् श्री
रामसदृशः पुत्रः पौत्रो यस्य प्रजायते वसिष्ठैः शत्रुभिर्मंत्रीपारिभूतो वमानितः तदाहनदहनेन्द्रस्कानामा
नैवैरिणो भवेत् ध्यात्वा रघुपतिं क्रुद्धं कालानलमिवापरं आकर्णसशराकृष्टकोदंडभुजमंडलं रणांगणे
विघ्नन्सर्वान्नीतानामार्गणाहृशिभिः संहरंतं महावीरसैंद्ररथेव्यवस्थितं लक्ष्मणादिमहावीरैर्युतं मदादि
भिः कोटिकोटिमहावीरैः शैलवृक्षकरोद्यतैः वेगात्करालझंकारभोभोकारमहारवैः नदद्भिरभिधावद्भिः स
मरे रावणं प्रति एवं ध्यात्वा निराहारो मारणाय रिपोशुनः वज्रकृत्याक्षाल्मलीपुष्पैर्दशांशं साधकोत्तमः॥ २०

20

पैश्वर्य्येणसमृद्धोपिनशत्रुरवशिष्यते वैरिणंरावणंध्यात्वातथात्मानंरघूद्वहं विधायपूर्ववत्सर्वमना
यासेनमारयेत् येनैवसंस्मृतःकोपात्सयात्येवयमालयं सीताहरणशोकाद्धिसंभूतमचेतनं जपेद्रघुप
तिंध्यायन्जलाहारोजलेवसन् दशांशान्तिलैर्होमल्लभयेच्छत्रुसंहतिं निधायवायवीजंतेननामभ्राम
येतिचजपेल्लक्षंनिराहारोजुहुयाच्चतिलैरपि रामंध्यात्वाविषण्णंचसीतान्वेषणतत्परं भ्रामयेत्सचिरं
मात्ताद्रेमाद्रिमपिवैरिणं समुद्रतीरेलंकायांहेमप्राकारसन्निधौ सुग्रीवादिभिरध्यक्षैर्देवैर्जीविवदा
द्भिः उपास्यमानंसदसिध्यात्वारामसलक्ष्मणं विभीषणायचायातेप्रसन्नंशरणार्थिनं वरदंतंजपेल्ल
क्षंजुहुयात्पंकजैरपि स्वस्थानमानयेत्क्षिप्रंराजानमथवाप्रभुं निमील्यचक्षुषीस्वेदाउपलभ्यपुनःपुनः
प्रमोदयंतंसहसाविनोदमैथिलीप्रियं रामंध्यात्वाजपेल्लक्षंहुत्वारक्तांबुजैरपि संमोहयतिवेगेनराजा
नमथवाप्रभुं निमील्यचक्षुषीस्वेदाउपलभ्यपुनःपुनः [illegible] सतींतामनिवर्ण्यात्रषट्
प्रयोगेष्वदर्शनं सर्वाभीष्टार्पितस्त्वस्ययोतनायमुनेःपुनः नेवकर्तव्यमित्येवमुक्तिर्हिरतरायतः किंचप्र
योगवन्मुक्तानांपरलोकोनविद्यते प्रयोगास्सिरेतेषांफलंनान्यद्भविष्यति निःकामानांचलोकानांजपहोमा।

अ॰ सं
२१

21

र्चनादिभिः मुक्तिरेव फलं तेषामिदं किंचिन्न विद्यते एकैकस्य विधानस्य न अत्रापि फलद्वयम् सतीक्ष्णाद्दा
ष्यते तस्मान्निष्कामो राममर्चयेत् विहन्त्वलास्त्रमादाय पशुपाशादैन विमोचयेत् नायं मुक्तिप्रदो मंत्रो मार
णादौ प्रयोज्यतां ॥ ॥ इति श्री अगस्त्यसंहितायां पंचदशोऽध्यायः ॥ १५ ॥ अगस्त्य उवाच
अथ वक्ष्ये विधानानि पौरश्चरणिके विधौ विना येन न सिद्धिः स्यात् मंत्रो वर्षशतैरपि भक्तिश्रद्धेष्टदानादि विरामो
स्त्रिप्रसादितात् गुरोर्मंत्रवरं लब्ध्वा सर्वाभीष्टप्रदं वयः पूर्ववत्प्रजपेन्नित्यं जपेच्च नियतव्रतः षट्सहस्रं सहस्रं वा
शतमष्टोत्तरं शुचिः एवमाराधितो रामो यदा भक्तिः प्रबोधयेत् पुरश्चरणाकृत्याय पूर्वसेवा विधीयते य
थाशक्तिनियम्यांतर्बहिरात्मानमात्मवित् पुरश्चरणवत्सर्वं कुर्याद्धोमं विहाय तत् ततः संकल्प कुर्वीत पु
रश्चरणमादरात् चिरं निरंतरे रैणो वनियतात्माटदृढव्रतः शैलाग्रे जलमध्ये वा नीरे वा लवणांबुधेः नदीती
रस्थस्य मूले रम्ये विल्ववनांतरे सत्यं पुण्यवशिवस्थाने द्वषभादि विवर्जिते अश्वत्थविल्वतुलसीवने पुण्यां
नराहुते गवांगोष्ठेषु तीर्थेषु पुण्येष्वन्येषु शस्यते वैदिकाचारयुक्तानां शुचीनां श्रीमतां सतां सत्कुलस्या
नजातानां भिक्षाशी चाग्रजन्मनां भुंजानो वा हविष्यान्नं शाकयावकमेव वा फलं मूलं पयो वापि यद्यत्रोपपद्य

ते उपस्तीर्य्याभिधार्य्येत तत्संस्कृत्य प्रोक्षणादिभिः पावयेद्वैदिकैर्मंत्रैः पुनर्मंत्रेण मंत्रवित् नित्यं नैमित्तिकं च य
त्कुर्वीत वाश्रमोचितं वर्जयेत्काम्यकर्माणि स्वाश्रमाविहितं च यत् लवणं च पलं चैव क्षारं क्षौद्रं रसांतरं माष
मुद्गमसूरांश्च यावान्कोद्रवांश्चणकानपि असंभाषणमन्यानां वर्जयेदन्यमज्जनं तदेव कर्म कुर्वीत तत्तन्मना स्तत्प-
रायणः अधः शयानः शुद्धात्मा जितक्रोधो जितेंद्रियः असत्यभाषणं ग्राम्यभाषणं परिवर्जयेत् सम्भ्येरपि न
भाषेत जपहोमार्चनादिषु यदि भाषेत तत्काले सम्भ्येः प्रस्तुतसाधकः अन्यथानुष्ठितं सर्वं भवत्येव निरर्थकं
वाङ्मनःकर्मभिश्चैव निस्पृहो वनितादिषु वर्जयेद्गीतकाम्यादिदर्शनं श्रवणं तथा तांबूलगंधलेपं च पुष्पधारण
मेव च मैथुनं तत्कथालापं तद्गोष्ठीरपि वर्जयेत् कौटिल्यं तीरमभ्यंगमनिवेदितभोजनं असंकल्पितकृत्यं च वर्जये
न्मर्दनादिकं त्यजेदुष्णोदकस्नानं सुगंधामलकादिकं शिरोगं पंचगव्येन पावयेद्वहिरंतरं स्नायाच्च पंचगव्येन केव
लामलकेन वा श्रुतिस्मृतिपुराणोक्तमंत्रैः स्नायादनंतरं अनुतिष्ठेद्व्रतेष्वेयं शुचिव्रततमोनिशं सितं हैमंतिकं चैव
शाल्यन्नं स्वीयसंभृतं अशूद्रावहृतं पक्वान्नं तु क्षोभ्य हतं च यत् दधि क्षीरं घृतं चैव पेतवं गुडवर्जितं तिलाश्चैव सिताः मु
द्गाः कंदः केसुकवर्जितः नारिकेरफलं चैव कदलीलवलीतथा आम्रमामलकं चैव पनसाद्दहरीतकी व्रतांतरप्रशस्ता
चहविष्यं मन्यते बुधैः अवैसवमसध्यं च न प्रशस्तं व्रतांतरे त्याज्यमेवात्र तत्सर्वं यदीच्छेत्सिद्धिमात्मनः इमा हींसा

अ सं
२२

दयाशीलो गृहीतस्थिरनिश्चयः यदैतद्दैवतं कर्म स्थिरधीः कर्तुमास्थितः जपेच्च नियतो नित्यं त्रिकालं पुरुषोत्तमं
अर्चयेन्मंत्रमव्यग्रो जीवत् षट्लक्षमादितः तर्पयेच्च विधानेन दशांशं शुद्धचारिणा पुष्पाक्षतादियुक्तेन जलेन संपू
ज्य सर्ववत् ततो विल्वफलैः शुभ्रैः पुष्पैरपि हुताशने राममावाह्य चाराध्य सर्ववज्जुहुयात्स्वयं मधुरत्रययुक्तं च पत्रैर्वा
पायसेन वा तिलैर्वा स्मृतमैरेषां ब्राह्मणान्भोजयेत्ततः सन्ध्या त्रैकालिकी नित्यं जपस्तर्पणमेव च होमो ब्राह्मणभु
क्तिश्च पुरश्चरणमुच्यते गुरोर्लब्धस्य मंत्रस्य प्रसन्नाच यथाविधि। पंचांगोपासनं सिद्धेः पुरश्चैतद्विधीयते नि
ष्कामानामनेनैव साक्षात्कारो भवेदपि अर्थसिद्धिः सकामानां सर्वं तन्निष्फलं भवेत् पंचांगमेतत्कुर्वीत यः पु
रश्चरणं बुधः सर्वैर्विजयते लोके विद्यैश्वर्यसुतादिभिः दाता भोक्ता वरिष्ठोयं जायते जातिषु स्वयं ख्याता
श्रुतशास्त्रस्य श्रुतानामपि भूतले चिरायुर्भाग्यवान्पुत्रपौत्रसौभाग्यवान्सुधीः विधानमयमेवस्यादुर्मस्य यश
सः श्रियः यदिच्छति लभेत तत्तन्मनसा पितपोधन असाध्यमपि देवानां द्वीपांतरगतं च यत् पंचांगोपासनं कृत्वा
यद्यदिष्टं तदाप्नुयात् आदावंते च मध्ये च ब्राह्मणान्वह भोजयेत् दिने दिने यथाशक्त्या राममुद्दिश्य भक्तितः
पंचांगोपासनं भक्त्या पुरश्चरणमुच्यते एतद्धि तपसां श्रेष्ठं संसारोच्छेदकारणं नानेन सदृशो धर्मो नानेन सदृशं तपः
नानेन सदृशं किंचिदिष्टार्थस्तपोधन यदि होमे तु शक्तिश्च सन्ध्यायां तर्पणेपि वा तावत्संख्यजपेनैव ब्राह्मणाराधनेन

च भवेदं घाढयेनैव पुरश्चरणमार्थ्यवैः यद्यदंगं विहीयेत तत्तत्संख्याद्विगुणो जपः कर्तव्यः सांगसिद्ध्यर्थं तद्दशांशेन भक्तितः
न चेदंगं विहीयेत ततो वेष्टमवाप्नुयात् अंगहीनं भवेद्यद्यत्कर्म नेष्टार्थसाधकं सर्वथा भोजयेद्विप्रान् कृतसांगत्व
सिद्धये विप्राराधनमात्रेणाखिलं सांगत्वमाप्नुयात् न्यूनातिरिक्तकर्माणि न फलंति मनोरथान् पूजयेच्छ्रद्धया तेनैव
समस्तानि फलंति च अतो यत्नेन विदुषो भोजयेत्कर्म सर्वदा यानि घान्यपि कर्माणि हीयंते द्विजभोजनैः निरर्थ
कानि तानि स्युः पुष्पाणि बीजांकुराणि च तस्यैव वस्त्रतिलत्वेप्युपास्ते बद्धिर्वचनं रामराधनको मंत्रस्तद्ध्यानं जपउत्तमः
मंत्रार्थालोचनाम्नोयं स्वयमेवेष्टसाधकः योर्चयद्विपुषो नित्यं रामं तन्मेव चिंतयेत् इह भुक्तिश्च मुक्तिश्च भवेत्तस्य न सं
शयः ५१ इति श्रीअगस्तिसंहितायां षोडशोध्यायः ॥ १६ ॥ अगस्त्य उवाच अथाभिषेकं वक्ष्यामि दीक्षाविधि
मन्तमम् उपासनशतेनापि विना येन न सिध्यति उपासकस्तु श्रद्धात्मा गुरुं यत्नेन तोषयेत् स्ववित्तचित्तकामै
श्च भक्तिश्रद्धासमन्वितः यथा ददाति संतुष्टः प्रसन्नवदनो मनुः स्वयमेव तथा चैवमिति कर्तव्यतामियात् वि
शुद्धं कालदेशौ च श्रद्धात्मा नियतो गुरुः संकल्पो योप्यकर्तव्यमंकुरारोपणं स्मृतं कुर्यान्नांदीमुखश्राद्धमादौ च स्व
स्तिवाचनं स्वगृह्योक्तविधानेन तदेतद्विदधीत वै मधुमासे भवेद्दुःखं माधवे रत्नसंचयः मरणं भवति ज्येष्ठे आ
षाढे बंधुनाशनं समृद्धिः श्रावणे नूनं भवेद्भाद्रपदे क्षयः प्रजानामाश्विने मासि सर्वतः शुभमेव हि ज्ञानं स्यात्कार्तिके
सौख्यं मार्गशीर्षे भवत्यपि पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनं फाल्गुनेपि समृद्धिः स्यान्मलमासं विवर्जयेत् रवौ

अ॰सं
२३

त्रैराशिते सोमे ·· यंत्रयसौरयोः अश्विनी रेवती स्वाती विशाखा चोत्तरस्त्वभेषु च ज्येष्ठा नक्षत्रयोषेवं कुर्यान्मंत्राभिषेचनं पूर्णि
मा पंचमे चैव द्वितीया सप्तमी तथा त्रयोदशी च दशमी प्रशस्ताः सर्वकामदाः पक्षांगशुद्धदिवसे स्वोदयो तिथिवारयोः
गुरुशुक्रोदये शुद्धलग्ने द्वादशशोधिते चंद्रताराद्वतुकूले च शस्यते सर्वकर्मसु सूर्यग्रहणकालेन समानो नास्ति कश्चन
यत्र यत्र कृतं सर्वमनंतफलदं भवेत् न यास्ति तिथिवाराणां शोधनं सूर्यपर्वणि ददातीष्टं गृहं यत्र तस्मिन्काले शुनीश
र सिद्धिर्भवति मंत्रस्य विना यासेन वेगतः अतस्तत्रैव रामस्य मंत्रतीर्थाभिषेचनं कर्तव्यं सर्वयत्नेन मंत्रसिद्धिमभीप्सुभिः
चतुर्भिर्वर्णकैः सम्यक् नीलपीतसितासितैः पूर्ववन्मंडलं कृत्वा तत्र धान्यांजलिद्वयं निधाय कलशं तत्र तीर्थतोयसुपूरितं
नालिकेलिफिलोपेतं मंगलैः परितोज्ज्वलत् सर्वोत्सवसमायुक्तं कृत्वा तत्रार्चयेद्धरिं ऋग्यजुःसामसूक्तैश्च स्मार्तैः
पौराणिकैरपि मंत्रैरागमिकैश्चैव वैदिकैर्देवमर्चयेत् वरयेद्ब्राह्मणान्वासःकुंडलांगुलिभूषणैः आचार्यैतैः स्वसूक्ते
न मंत्रान् विसोत्सवे शुने गुरुः पूर्वोक्तविधिना भूतशुद्ध्यादि याचरेत् न्यासजालं प्रविन्यस्य पूजयेत्तत्र पूर्ववत् पूजनीय
श्च पूर्वोक्तसाधनैः गुरुषोडशमं पूर्वोक्तगीतनृत्याद्यैः कृत्स्नं वेदनकारयेत् गुणवत्त्री भोगेष्टद्रव्यभोदयाढ्य स्वविस्तरं
गंधपुष्पांबुतांबूलं सहासीभूषणादिकं भोजनं चान्नपानीयै रम्यैर्भोपितपोनिधे एवं तत्रोत्सवं कृत्वा रात्रौ जागरणं चरे
त् एवं दिवा च रात्रौ च त्रिकालं पूजयेत्प्रभुं षट्सहस्रं जपेत्तत्र पूजांते हर्निशं गुणे परेह्नि तथा प्रातः पूर्ववत्सर्वमाचरेत्
संपूज्य विधिवद्धाममग्निकार्यं यथाचरेत् पूर्ववत्कुंडमध्याय कुर्यात्तत्रापि मंडले तत्राप्यग्निं समाधाय रामं तत्रार्चयेत्प्रभुं

23

सांगावरणमावाह्य पूर्ववच्च यथाविधि   तदग्निस्थापनाद्यं च सर्वं पूर्ववदाचरेत् दधिदुग्धाज्यसंयुक्तैर्दशांशं जुहुयात्ति
लैः हुत्वा पूर्णाहुतिं कृत्वा तत्रस्थं कुंभमर्चयेत् ततो दिक्षु बलिं कृत्वा कृतमेतत्समाचरेत् ततः शिष्यं सुपानीयभक्तिनम्रमक
ल्मषं प्राणानायम्य विधिवद्भूतशुद्धिं विधाय च सुरास्त्वामिति मंत्रेण बहुभिर्ब्राह्मणैः सह अभिषिंचेच्च तन्मूर्ध्नि तदेतत्कलशोद
नारायणः स्वयं रामः शिष्यं सन्निदधीत वै सर्वतः सर्वगो ह्यस्मिन्प्रसीदति दयानिधिः इति संस्मृत्य संस्मृत्य तज्जलैरभिषेचयेत्
परिधाय च वासांसि चंदनादि विलिप्य च कुंडलान्यंगुरीयं च धारयित्वा न्यसेत्ततः वैष्णवीं मातृकां चैव तत्त्वन्यासं तथैव च
तन्मूर्तिपंजरं न्यासं षडंगादिन्यासमेव च पूर्ववद्विधिवच्छिष्य तन्नावेव प्रविन्यसेत् ततस्तच्छिरसि स्वहस्तं दत्त्वा शतं ज
पेत् अष्टोत्तरशतं मंत्रं दद्यादुदकपूर्वकं प्रयत्नेन वदत्तस्मै शिष्याय मुनिपुंगव स्वतेजो ज्योतिर्मयीं विद्यां गच्छंतीं भावये
द्गुरुः आगतां भावयेच्छिष्यो धन्योस्मीति विशेषतः कृतकृत्यस्ततः शिष्यस्तस्मै सर्वं निवेदयेत् यच्च यावच्च यद्यत्तत्तद्गुरवे ह्य
हं चेतनः गोभूहिरण्यविपिनगृहदेवादिकं धने न चेदर्धं तदर्धं वा दशांशमथवापि वा अक्लेशाद्वस्त्रवस्त्रादि दद्याद्वित्तानु
सारतः प्रकारांतरमालंब्य गुरुं यत्नेन तोषयेत् गुरुपुत्रकलत्रादीं तोषयेद्बहुभिः स्वयं अदेयादिष्वबहुभिर्भक्त्याच्छाद
नभूषणैः एवं गुरुं प्रकारेण गुरवे दत्तदक्षिणः कृतकृत्यं तथात्मानं … विप्रांश्च भोजयेत् तेभ्योपि दक्षिणां दत्त्वा सर्व
तत्परितोषयेत् ब्राह्मणीर्वचोभिश्च गुर्वाशीर्भिः समेधितः विसर्जयेच्च गुर्वादीन्स्ततो भुंजीत मंत्रवित् एवं लब्धमनुर्विप्रः

कृतार्थस्स्यान्नसंशयः तदातिसंध्यांकुर्वीतनियतोगर्ववर्जितया सायंप्रातश्चमध्याह्नेरामंध्यात्वामन्त्रंजपेत् जलंमंत्रेणसंशो
ध्यकवचेनावगुंठ्यच चक्रीकृत्यजलेसम्यक्दर्भमूलेनमंत्रवित् आवहनादिमुद्राभिस्तीर्थमावाह्यपूजयेत् ब्रह्मांडोद
रतीर्थानिकरैःस्पृष्टानितेरवेः तेनसत्येनमेदेवतीर्थंदेहिदिवाकरः गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुका
वेरीजलेस्मिन्सन्निधिंकुरु एवंचाराध्यमावाह्यविधिवज्जलमुत्तमे आदायांजलिनासम्यक्जपेन्मालामंत्रंसकृत् ज
लंदक्षिणहस्तस्थंसव्यहस्तेविनिःक्षिपेत् ततोरामोहमस्मीतिगायत्रींनियतोजपेत् जन्मप्रभृतियत्पापंदशभिर्वापि
संचितं पुराकृतंसतेनापिसहस्रेणजपेनवा वदेद्दशरथायेतिविद्महेतिपदंततः सीतापदंसमुद्धृत्यवल्लभायततोव
देत् धीमहित्यपितन्नोचरामश्चापिप्रचोदयात् एषास्माकंममगायत्रीभुक्तिमुक्तिप्रदायिनी पुरश्चरणमस्यास्ति
चतल्लक्षजपावधि यच्चयावच्चपूजादिसर्वंपूर्ववदाचरेत् होमादिरेषागायत्रीमुक्तिमेवप्रयच्छति मायादिरपि
वैकुंठं रमादिश्रियंमुने मदनेनापिसंयुक्तासंमोहयतिमेदिनी त्वनयाराधितोरामःसर्वाभीष्टंप्रयच्छति
तर्पयेच्चततोमूलमंत्रोच्चारणपूर्वकं स्तवंचप्रणामंचामययाशाक्तयामुनीश्वर कृत्वैवंप्रत्यहंसम्यक्त्रिसंध्यं
चयथाविधिः कृतकृत्योभवेन्मंत्रीसत्यंसत्यंचनान्यथा ॥ ६२ ॥ इत्यगस्त्यसंहितायांसप्तदशोऽध्यायः ॥

१७॥

अगस्त्य उवाच अथ पूजाविधानानां लक्षणान्यपि वक्ष्महे गंधं चंदनपुष्पाणि धूपदीपनिवेदने हविरेतानि मु-
ख्यानि साधनानि मुनीश्वर स्थलमध्ये च पात्राणि शंखं चैषां च लक्षणं अन्यानिवेदितशुद्धिं प्रकृतिस्थं सुशीतलं
हेमादिकलशांतस्थं पूजासाधनमिष्यते अनन्यार्पितपूतानि गंधवंति सितानि च पीतान्यपि मनोज्ञानि छिद्रेण
रहितानि च पुष्पाण्येवात्र शंसंति न चेत्सर्वं निरर्थकं चंदनं मलयोत्पन्नमनाघ्रातं सुशीतलं कर्पूरागुरुकस्तूरी
हिमाह्वादिविवासितं पूजायां शस्यते धूपस्ताम्रकांस्यादिनिर्मिते पात्रेऽपि द्विपदे लग्ननाले पद्माकृतौ शुभे सा-
रांगारविनिक्षिप्ते गुग्गुलागरुहृतजे निर्धूमसायुस्थिते धूपे गंधद्रव्यैश्च चोत्तमैः अनन्यार्पितगंधोयं शस्यतेऽर्चनक-
र्मणि दीपोऽपि पूर्ववत्पात्रे मंडलाकारकारितः प्रतिपूर्वप्रदीप्तस्य वर्त्या गव्यघृतादिना अन्यानिवेदितः पूजाक-
र्मण्येव प्रशस्यते पायसापूपसंपाद्यं फलोर्पितं हरिद्भिने शुद्धं च पङ्कसोपेतमनन्यार्पितमिष्यते नैवेद्यमर्चने नाम्भ-
सतां मूलनिवेदितं स्थलं प्रसादविपिननदीतीरगतं समं चत्वरं संचतुर्हस्तं हस्तोन्नतसवेदिकं चंद्रातपपताकादि-
तोरणौघैर्लसच्छुचिः विविक्तं च विशेषेण शस्यतेऽर्चनकर्मणि पात्राणि ताम्रहेमादिनिर्मितानि जलांतरे जलजा-
नीव निर्माय पाद्यार्घ्यार्हणादिषु उपचाराणि शुद्धानि शस्यंते च विशेषतः शंखो नाम समावर्तः पृष्ठमध्ये तु नाल-
कः सितैस्सप्ररितोनीरैः शस्यतेऽर्चनकर्मणि एतान्यन्यानि पूजायां साधनानि बहूनि च तान्युत्तमानि मध्यानि न्य-

ग्र· सं
२५

25

नानिविधिवंतिवै स्वस्थः समर्थः कुर्वीत वोत्तमैरेवसाधनैः मध्यमोमध्यमैरेवन्यूनोन्यूनैस्तपोधन आपन्नश्चेत्सम
र्थोपिस्वल्पैरेव समाचरेत् पूजाकर्मविशेषेणादेशकालानुसारतः यथाशक्तियथान्यायं यथयथालोकविगर्हितं एके
नवान्यत्सकलाकुर्य्याद्देवार्चनं रहः मुद्राश्चदर्शयेत्पश्चाद्देवसान्निध्यकारिणी दर्शितास्ताश्चदेवानां द्रावकान्मो
दकान्मुने दर्शनीयाः स्मृतीस्तासातो देवतायागकर्मणि आवाहनीस्थापनीच सान्निधीकरिणीतथा स्वसन्निरोधिनी
मुद्रासम्मुखीकरणीतथा सकलीकरणंचैवमहामुद्रातथैवच शंखचक्रगदापद्मधनुः कौस्तुभगारुडाः श्रीवत्सवन
मालेचयोनिमुद्रांच दर्शयेत् मूलाधारद्वादशांतमानीतः कुसुमांजलिः त्रिस्थानगततेजोभिविनीतप्रतिमादि
षु आवाहनीयंमुद्रास्यादेवार्चनविधौमुने पृष्ठेवास्येवमुद्रास्या ···· त्सन्निरोधिनी उत्तानमुष्टियुगलासम्मुखीक
रिणीमता अत्येष्वेवांगविन्यासः सकलीकरणंभवेत् अन्योन्यांगुष्ठसंलग्नाविस्तारितकरद्वयी महामुद्रेयमाख्या
तान्यूनाधिकसमापत्ती कनिष्ठानामिकामध्यातर्जनीमुकुलीकृता करद्वयेनमुद्रास्याच्छंखाख्येयंस्वरार्चने अन्यो
न्याभिमुखंस्पृष्टांगुलिप्रोन्नतमध्यमाः अथांगुष्ठद्वयंमध्येदत्वापिपरितस्करौ मंडलीकरणंसम्यगंगुलीनांतपोधन
पद्ममुद्राभवेदेषाधेनुमुद्राततः परं अनामिकेकनिष्ठाभ्यांतर्जनीभ्यांचमध्यमे अन्योन्याभिमुखाश्लिष्टेततः कौ
स्तुभसंज्ञकाः कनिष्ठेन्योन्यसंलग्नेसम्मुखेपिपरस्परं वामस्यतर्जनीमध्येमध्यानामिकयोरपि वामानामिंसंस्प

ष्ठात्तर्जनीमध्यमगता पर्यायेणानमांगुष्ठद्वयी कौस्तुभलक्षणा कनिष्ठान्योन्यसंलग्ना विपरीतानि योजिता अ
धस्तात्तापितांगुष्ठा मुद्रा गरुडसंज्ञिता तर्जन्यंगुष्ठमध्यस्थामध्यमानामिकाद्वयी कनिष्ठानामिकामध्यतर्जन्यग्रक
रद्वयी मुने श्रीवत्समुद्रेयं वनमाला भवेत्ततः कनिष्ठानामिकामध्या मुष्टिरुन्नीततर्जनी परिभ्रान्ता शिरस्युच्चैः
स्तर्जनीभ्यां दिवौकसः मुद्रा योनिः समाख्याता तत्करद्वयदर्शिनी तर्जन्याकृष्टमध्या च ततो नामिकयुग्मकाः
मध्ये मूलस्थितांगुष्ठा ज्ञेया शास्त्रार्थवेन मुने एताभिर्दशमुद्राभिः पूर्वोक्ताभिस्समभिः यो राममर्चयेन्नित्यं मोद
येत्सस्तरेश्वरं द्रावयेदपि विद्विषं ततः प्रार्थितमाप्नुयात् लक्षणान्यासनानां दिवक्ष्यामि मुनिसत्तम तानि स्वस्ति
कवज्राब्जवीरादीनि भवंति वै कृतोत्तानौ तु तौ पादौ तत्रैवोरुद्वयं समं निधाय निश्चलं ह्येतत् श्रेष्ठं सर्वेषु कर्मसु
वामांकाग्रे कृतं ह्येतद्वीरासनमुदाहृतं योगासनं च मुख्याधः पार्ष्णिद्वयपदान्तरं यथांकयोर्निधायैतद्योगिभिः श्रेष्ठप्र
यच्छति वामांकपार्श्वं पार्ष्णिं च दक्षिणां चेदुद्वयं मुनेः पार्ष्ण्यन्तरं निधायैकं कुर्याज्जानुद्वयं समं गोमुखासनमेतत्स्या
त्सर्वरोगविनाशनं आसनानि बहूनि स्युरेवमेवाब्जपादिषु येन केनासने योगी धीरः स्थित्वाब्जपादिषु कुर्वीत भक्तिश्रद्धा
स्तु भावयेत्पुरुषोत्तमं एवं यः कुरुते पूजां जपहोमादिकं मुने सर्वेषामिष्टपूज्यो मिहलोके परत्र च पूजाजपस्य हो
मस्य मंत्राणामाकृतिस्तथा दीक्षाभिषेकमार्गोपि दर्शितस्तेत योयन पूजोपकरणादीनां लक्षणान्यपि सुव्रत दर्शिता

निश्चयत्वेनसर्वंभक्त्यावधारय स्वतीत्तोभिहितंयद्ध्वैसर्वंभुक्तिमुक्तिदं नावैष्णवेभ्योवक्तव्यंनश्राव्यमितिमेमतिः
यत्नेनविष्णुभक्तायप्रार्थितेदेयमेवहि ५८ ॥ इतिश्रीअगस्त्यसंहितायामष्टादशोऽध्यायः १८ ॥ अगस्त्यउ॰
स्वतीत्तामंत्रवर्य्येषुश्रेष्ठोवैष्णवउच्यते गाणपत्येषुशैवेषुशाक्तसौरेष्वभीष्टदः वैष्णवेष्वपिसर्वेषुराममंत्रफला॰
धिकः गाणपत्यादिमंत्रेषुकोटिकोटिगुणाधिकः मंत्रस्तेष्वप्यनायासफलदोयेषडक्षरः षडक्षरोयंमंत्रस्तुस
र्वाघौघविनाशनः मंत्रराजइतिप्रोक्तःसर्वेषामुत्तमोत्तमः दैनंदिनंतुदुरितंपक्षमासर्तुवर्षजं सर्वंदहतिनिःशेष
मूलाचलमिवानलः ब्रह्महत्यासहस्राणिज्ञानाज्ञानकृतानिच स्वर्णस्तेयसुरापानगुरुतल्पायुतानिच कोटि
कोटिसहस्राणिउपपातकजान्यपि सर्वाण्यपिसमंयांतिराममंत्रानुकीर्तनात् भूतप्रेतपिशाचाद्याःकूष्मांडग्रहराक्ष
साः दूरादेवप्रधावंतिराममंत्रप्रभावतः मालिन्यमपिसांकर्य्ययद्यद्यावद्गृहस्थितं सर्वंविलयमाप्नोतिराममंत्रेण
/कीर्तिते आश्रमवीजदोषाश्चनियमातिक्रमोद्भवाः स्त्रीणांचशूद्रकृषाणांसुमंत्रेणानेननाशिताः येष्वयेष्वपिदेशेषु
रामःपरमुपास्यते दुर्भिक्षादिभयान्येषुनभवंतिकदाचन शांतःप्रसन्नोवरदोऽक्रोधनोभक्तवत्सलः अनेनसदृ
शोमंत्रोजपत्स्वपिनविद्यते अनेनाराधितोरामःप्रसीदत्येवसत्वरं ददात्यायुष्यमैश्वर्यंसमानोन्नमतामपि यप्
वमुक्तमात्रेणमंत्राराधनतत्परः सकामोभुक्तिमाप्नोतिनिष्कामोमुक्तिमेवच प्राप्नोत्युभयकामोस्तुभुक्तिमुक्तिनसंशयः

सुतीक्ष्णउवाच श्रुतिस्मृतिपुराणार्थनिश्चयज्ञानवित्तमः संदेहंछिंदि पृक्षामि नानाशास्त्रप्रहंकरु आत्मानुभवरूपेणाप्रा
प्तात्कारेणकेवलं ग्रनराहनिरहितंशाश्वतंब्रह्मलयात्पि इतिश्रुत्यादितत्त्वज्ञाः प्रवदंतिमनीषिणः श्रीमताभिहितंरा
मेमंत्रानुष्ठानतत्पराः भुक्तिंमुक्तिंचविंदंतिकथमेतन्निबोधय निवृत्तिरेवमुक्तिस्तुप्रवृत्तिर्भुक्तिरुच्यते उभयोरप्ये
करैवकथंमार्गोभवेदिद त्वयाचैवयदुक्तंतत्सत्यंसत्यंवदांवर सर्वजन्यस्तवोक्तिर्निर्द्वंद्वोक्तिर्निश्चितत्त्वतः निवृत्ति
लक्षणाह्येतामुक्तिरित्यभिधीयते विषयात्यंतसंसर्गकरणानांसदासह भुक्तिंप्रवदतेलोके वैषम्यमुभयोरिह
तथाप्यात्मानसंधानमुभयत्रापिदृश्यते मुक्तिरात्मानुसंधानेनात्मावस्थानमेवहि एतदुक्तंवतत्त्वज्ञसर्वतत्त्वविदां
सतां प्रवृत्तौचनिवृत्तौसर्वदात्मानुभाविनां किंचरामोहमित्येवसर्वदानुसरंतिवै नतेसंसारिणोनूनंरामएव
नसंशयः रामएवात्रभोक्ताचभोज्यमार्थ्यमुनिक्रिया एकस्मिन्नेवशिष्टेत्रकिमसत्त्वप्रसंजनं अतोनमुक्तिमार्गो
स्यरोधिनीभुक्तिरिष्यते अनेनविधिनारामंयएनमनुतिष्ठति सभुक्तिमपिमुक्तिंचलभतेनात्रसंशयः यथावि
धिनिषेधौतुमुक्तिंचैवप्रसर्पतः तथानस्यशास्त्रारामोपासकंविधिपूर्वकं सदारामोहमित्येवचिंतयेदप्यनन्य
धीः नतस्याविहितंलोकेनिषिद्धंचनविद्यते अतोरामोहमित्येवतात्पर्येणवदंतिये रामोनामतएवस्युर्नतेषां
विहितादिकं दातव्यमस्मैददतियेयावत्क्रियदन्वहं उदकौदनवस्त्राणिरामायैवनसंशयः अतोब्रह्मविदेदत्त

३ अ.सं मानंत्यायैवकल्प्यते येद्विषंत्यपिनिंदंति तत्यापफलभाजना: ऊढुं विनोदविज्ञास्तुर्ईः खिन्नः स्तुर्नसंशयः ततः
२७ स्वतात्मसुत्यागस्तयमेवदद्देदपि कारादृष्टेषुसर्वेष्वनिर्निमित्तंनगृह्यते अहोस्यमंदभाग्यस्ययावत्तद्धितयेभवेत्
अतोब्रह्मविदांद्वेषोनकर्तव्यफलेप्सुभिः निंदावनैवकर्तव्याहितमेवसमाचरेत् येत्ववंत्यत्रमोदंतिदंदंत्यस्मैममी
षिणः तत्स्वरूपमविलंलब्धातद्वतंप्रायस्ववंत्यपि ज्ञात्वातमेवमात्मानंब्रह्मत्वंऊरुनिरंतरं एतेनैवतवाभीष्टंसर्वंभव
तिनान्यथा त्यजदर्शनगोष्ठींचविहारेक्षांसमाचर हितमेवसतांनित्यमहिंसापरमोभव तत्त्वाभिसाधनान्यष्टौ
27 तानिवक्ष्यामितच्छृणु यमोनियमसंज्ञश्चआसनंचतृतीयकं प्राणायामश्चतुर्थःस्यात्प्रत्याहारस्तुपंचमः धार
णाचतथाध्यानंसमाधिरितिसप्ततः प्रत्येकमेषांवक्ष्यामिलक्षणान्यपिसुव्रत तद्विभज्यप्रवक्ष्यामितन्नलक्षणाम
प्यहो अहिंसासत्यमस्तेयंब्रह्मचर्यंदयार्जवं क्षमाधृतिमिताहारःशौचंचेतियमादश सर्वेषामपिजंतूनाम
क्लेशजननंतुनः वांमनःकर्मभिर्नूनमहिंसेत्यभिधीयते तृणादेरप्यनादानंपरस्वस्यतपोधन अस्तेयमेतद
प्यंगंब्रह्मप्राप्त्यैसनातनं अवस्थास्वपिसर्वासुकर्मणामनसागिरा स्त्रीसंगतिपरित्यागोब्रह्मचर्यंप्रचक्ष्य
ते परेषांदुःखमालोक्यस्वस्यैवालोच्यतस्यतु तत्साधनानुसंधानंदयेतिप्रोच्यतेबुधैः व्यवहारेषुसर्वेषु
मनोवाक्कायकर्मभिः सर्वेषामपिकौटिल्यंसाद्वित्यंत्यागार्जवंभवेत् सर्वात्मनासर्वदापिसर्वत्रैवापकारिषु २

वंधुष्विव समाचारः क्षांतिः स्यान्मुनिसत्तम इच्छाप्रयत्नराहित्यं जातेषु विषयेष्वपि लोभवत्स्वधृतिं धीराः प्रवदंति स
तां वरः भोज्यस्येव चतुर्थांशभोजनं स्वस्थचेतसः अम्लकटुतिक्ताम्ललवणादिविवर्जितं हितं मेध्यं स्मृतीत्वा
तत् मिथ्याहारं प्रचक्ष्यते निर्गतं रोमकूपेभ्योऽनवरं येभ्य एव च मलं वदंति द्वाराणां क्षालनं शौचमुच्यते मृज्ज
लाभ्यां वहिः सम्यक् निर्मलीकरणं पुनः पूर्वीकृत भूतशुध्यं तं शौचमाचक्षते बुधाः एते दशयमा ब्रह्मंस्तत्वशा
स्त्रिहेतवः तपस्तुष्टिरास्तिक्यमीश्वराराधनं तथा सिद्धांतावेक्षणं चैव लज्जा दानं मतिस्तथा जपो व्रतं दशैता
नि स्युर्नीत्या नियमास्स्मृताः प्रत्येकमेषां वक्ष्यामि लक्षणानि तपोधन तपस्त्वनशनं नाम विधिपूर्वकमिष्यते
अनायासोपवासेन तस्यार्थेनैव जीवितं तुष्टिरेषा च यार्थेन तत्याम्भिर्नान्यथा विना श्रुत्याप्रोक्तेषु विश्वास आ
स्तिक्यं संप्रचक्ष्यते इष्टदेवार्चनं सम्यक् विधिपूर्वकमन्वहं त्रिसंध्यमेकदा वापि भवत्येवेश्वरार्चनम् वैस
वागमसिद्धांतश्रवणं मननं तथा श्रुतिस्मृतिपुराणादिमध्यात्कानोर्कदर्शनं सिद्धांतश्रवणं ह्येतत् प्रोच्य
ते तत्त्वदर्शिभिः श्रुत्यादिभिर्लौकिकैश्च यद्यद्स्यं तन्निंदितं तत्राप्रवर्तनं लज्जा वा मनः कर्मणामपि यदिष्ट
देवतां ध्यात्वा तदर्घ्येण धियान्वहं तत्पात्रेदीयते मादितद्दानमभिधीयते गुरोर्लब्धस्य मंत्रस्य शश्वदावर्तनं
वयत् अंतरंगात्तराणां वम्यासपूर्वं जपो भवेत् कर्तव्यस्य समयस्य नियमग्रहणं व्रतं नियमव्यतिरेकेण सकलं नि

फलंभवेत् यमैश्चनियमैश्चैवकृतंयत्सफलंभवेत् अतोनियमतःसर्वंकृतंसाफल्यमाप्नुयात् ८५ ॥ इतिश्रीअ
गस्त्यसंहितायामेकोविंशोध्यायः १९ ॥ अगस्त्यउवाच एकैवस्थिरीभावःसर्वैस्तै र्नियमैःसह स्थूलार्पितशरी
रस्यैतदासनमुच्यते प्राणायामानथोवक्ष्ये समस्तोपकारकान् यैःकृतैःदह्यतेद्योघःशुष्कैंधनगिरिर्यथा इं
द्रियेष्वपियेदोषाःवातपित्तकफोद्भवाः त्वगसृङ्मांसमेदोन्यमज्जास्थिसितसंभवाः एतेसर्वेपिदह्यंते प्राणसं
तन्निरोधनात् प्रायश्चित्तमघौघानांसर्वमेतद्वदंतिहि पुनराहत्रिरहितशाश्वतब्रह्मकांतिभिः प्राणायामा
भ्यसनंतंकर्तव्योविधिवन्मुने सम्यङ्निरुध्यचप्राणानंतःकरणमात्मनि स्वयमेवावसिष्टःसन्ब्रह्मभूयाय
कल्पते जानुविंबकराग्रेणत्रिपरामृष्यसत्वरं प्रदद्याच्छोटिकामेकामितंमात्राकनीयसी मध्यमाद्विगुणाचैव
साज्येष्ठात्रिगुणामता अधमोमध्यमश्चैवप्राणायामस्तथोत्तमः अधमःपंचदशभिस्त्रिंशद्भिर्मध्यमोमतः मात्रा
भिरुत्तमःपंचचत्वारिंशद्भिरुच्यते प्राणायामैःकृतैःशश्वन्नित्यंषोडशभिर्मुने दिनेदिनेचयत्पापंतत्सर्वंनश्यतेध्रुवं
परोपतापजंपापंपरद्रव्यापहारजं परस्त्रीसेवनोत्पन्नंप्राणायामशतंदहेत् महापातकजातानिब्रह्महत्याशतानिच
सर्वाण्यपिप्रणश्यंतिप्राणायामैश्चतैःशतैः आदावंतेचयत्नेनप्राणायामान्समाचरेत् कर्मस्वपिसमस्तेषुअशुभे
शुभेष्ववा प्राणायामैर्विनायत्कृतंकर्मनिरर्थकं अतोयत्नेनकर्तव्याःप्राणायामाःशुभार्थिभिः यावत्कर्मस्यनिय

/ध्यात्मनसैव जपेन्मंत्रं रामं रामेष्टकर्मेऽर्थ्यायन् सर्वोक्तविधिवत्सुधीः धारयन्नंतरे वा सूत्रे किंचिन्निमील्य च
परं ज्योतिः परं ध्यायनंतरे वा मंत्रं जपेत् आपादमस्तकं सम्यक् प्रविशत्यनलो यथा यावतीभिस्तु मात्राभिरिंद्रि
यार्थेऽभिधावतः प्रवृत्त्यंते शरीरे च तावन्मात्रोऽस्तु संयमः प्राणायामैर्विना यस्य जपहोमादिकाः क्रियाः न भ
वंत्येव ताः सर्वाः यत्नेनापि कृता अपि इंद्रियाणां कृतार्थानां विषयेभ्यो निवर्तनं प्रत्याहारो भवेदेतत्सम्यगिंद्रियनि
ग्रहः जीवस्य ब्रह्मरूपेण निरोधो वायुशक्तिभिः सर्वोक्ता यांतमार्गस्था प्राणायामत्रयोऽद्भवा आत्मन्यपि स्थिरी-
भावश्चित्तस्यैव धारणा सम्यगालोचनं ध्यानं रामं हृदि निधाय च अंगानि भूषणैः सार्द्धं वाहनावरणैरपि सत्यज्ञान
सुखैकत्वप्राप्तिये प्राप्तिसाधने समाधिर्द्धर्मचिंतास्यादुवांतरश्रुतेष्वपि समाधिरथवा जीवब्रह्मणोरैक्यचिंतनं
ब्रह्मीभूय स्वयं जीवो निरुद्धाखिलविलीनधीः सतोऽप्यनन्यसद्भावस्वस्वमेवावशिष्यते सुषुप्तीवस्थितो वापि समाधिर
थवोच्यते एवमष्टांगसंयुक्तो योगयुक्तः स संयतः सूर्यस्य मंडलं भित्वा याति ब्रह्मसनातनं य एवमभ्यसेन्नित्यं वीतभीः
शांत एव च वशीकृतेंद्रियग्रामः सोऽमृतत्वाय कल्प्यते निरस्ताशेषदुरितः कामक्रोधविवर्जितः एवमभ्यासयोगेन
योगी याति परां गतिं कर्मयोगेन वा ज्ञानयोगेनाथो भयेन वा प्राप्यते पुनरावृत्तिरहितं ब्रह्म शाश्वतं करोत्यत्र दि
नेयस्तु तत्तत्फलगतस्पृहा जपहोमात्मकं कर्म स समीय च तत्फलं सगुणं निर्गुणं वाथ ध्यायेयो रघुवंशजं क

अ॰ सं मौनपेतत्ज्ञानेनसयात्स्वपरंपदं ध्यानेन कर्मणा चैव योभ्यसेद्योगमव्ययं सयात्येवोत्तमंस्थानं यद्गत्वाननिवर्तते
२९ अतः स्वतीतस्तायत्नेनयोगीभवतयोनिधे व्रतोपवासनियमैजन्मकोट्यानुष्ठितैः यज्ञैश्चविविधैः सम्यक् भक्तिर्भवति
राघवे संसारसागरस्यास्यपारंप्राप्तंकदीससि कर्मयोगीयवाज्ञानयोगेप्रविशसत्वरं सर्वभूतानिभूतानांश्रांतानां
गतचेतसां जातासपकः संसारेराघवः स्वयमेवहि प्रक्षीणाशेषपापानांज्ञानयोगः प्रशस्यते कर्मयोगस्तुसर्वेषांभवे
निर्वाणसाधनं ज्ञानेनकर्मणावापिरामंसम्यगिहार्चयेत् स्वतीतांतच्छरीरंतत्त्वयीत्यपिपतितस्तव त्वगास्थिमांसम
ज्ञास्थिमेदःशुक्रमयंतत्र शास्त्रोपपादितंसम्यक्तस्यप्राज्ञविशोधनं … निष्ठाविनाशिनं कर्मयोगंत
याज्ञानंयोगंवायोगवित्तम स्वकरिष्यामिकर्तव्यमितिकश्चिद्विचिंतयेत् स्वस्यास्येस्वयमेवाघंमंदोमूलिविनिःसृ
येत् सम्यग्वैराग्यनिष्ठस्यस्थिरतत्वस्यचेतसः छर्दितान्ननिभाः सर्वेदृश्यंतेविषयाःस्वयं शरीरत्वमिवप्राणैः
र्विरक्तस्यैवशोभते विरक्तस्यतदध्यात्तुत्याज्यंसर्वात्मनाभवेत् अंत्यमेध्यशरीरस्थंविष्टामध्यगतादपि तत्त्वनि
ष्ठाविशेषेणप्राणिनांमन्यतेहितं शरीरेस्मिन्नमेध्यत्वंमीदृशन्नामदेहिनां त्वगाद्यैकैकसंस्पर्शेस्नानमेवविधीय
ते शृगालैरपिदृष्टैश्चनीयतेयत्रहोविधि वियतेचर्मणानेवशरीरादिशरीरिणां तत्रप्रतिपदंसम्यक्सर्पदापद
मीदृशं ततःशरीरंविश्वस्यपरउदास्तेसमूढधीः उःवैकाग्रमवार्थायविधिनैनत्कृतंवपुः परमार्थविदस्येतद्दी

स्यमाणेनवीक्ष्यते व्यामोहितेजगत्यस्मिंमाययैवमहात्मनः विष्णोस्तस्यमातत्रभूत्वामोहयत्यखिलंजगत् सत
मायामयोभूत्वाकुटुंबभरणाकुलः भ्रमत्येवांतरोभूत्वादुःखावर्तेपुनःपुनः दुःखमित्येवजानातिस्वसुखेनैवतपो
धन सर्वात्मनापरित्याज्यंसर्वैर्ग्रामपिंडःखदे प्रविशेत्कोहतोमंदोहतोप्यादौपुनर्हतः नकिंचिदपिकर्मात्रनिष्फ
लंविद्यतेमुने तत्त्वेन्मुनः प्रवेशायभवेन्मुक्तोपिवक्ष्यते अतोनकर्मकर्तव्यंफलार्थित्वेनसूरिभिः यदिकुर्य्यात्फलं
तन्नदनपेक्षार्चनादिकं नचेत्पततिसंसारेदुःखावर्तेविमोहितः ईश्वरोपिसमुद्धर्तुंनशक्तोभवतिनान्यथा ४४
इतिश्रीअगस्त्यसंहितायांविंशोध्यायः ॥ २० ॥ अगस्त्यउवाच अथातोहंप्रवक्ष्यामिगुह्याद्गुह्यतरंमुने यद
शेषेणदुःखघ्नंतत्त्वं शृणुष्वतपोनिधे तत्प्राप्तिसाधनेनैवकर्मापीत्यपिचिंतयेत् कर्मणामेवयस्माद्धिविहितंस्व
कृतांसतां रहस्यमेकतानास्तितदसन्मुक्तयेकथं योयत्रवाधिकारित्वेचोदितस्ताहशेनहि जगत्यपिधनं
न्याय्येनागतंऊत्रमेवद ऋत्विक्कर्मतत्त्वज्ञायजमानहितैषिणः कवातिष्टंतिमंत्राश्चनियम्याध्यापिताः पुनः
अधीतानियमेनापिसम्यग्वापाठनंकृतः कथमेवंविधंकर्मफलसाधनमिष्यते यद्यत्रसाधनत्वेनयस्ययस्य
प्रचोदिताः तत्रैवोक्तंप्रयत्नेनतेषांगंचेत्तदसाधनेः कर्तुंकारयितुंवापिब्रह्माविष्णुर्महेश्वरः नशक्तोतीतिमेबुद्धि
विहितंविधिवत्स्वयं कोवान्योविधिवत्कर्मकृत्वेष्टंसाधयेत्फलं कर्मकर्ताविधिश्चैवसाधनानिबहूनिच यतस्मा

६ ग्र॰ सं य्यंफलंतेनप्राप्तीभवति देहवान् तेषांन्यूनातिरेकाभ्यांमतथाचोदितासती विपरीतफलस्यैवदात्रीस्यात्कृति
३० रंजसा निर्मलीकरणंकर्मैवदतीत्यपिचेनमः तत्फलानर्थिभिःसम्यकविहितंसदनुष्ठितं योगाभ्यासदशायां
तु नित्यंकर्मचनित्यशः नैमित्तिकंनिमित्तेषुकाम्यंनैवंसमाचरेत् सम्यग्ज्ञात्वान्वैराग्येयदाभवति देहवान् तदास
र्वंपरित्यज्यकर्ममोक्षायकल्पते योगाभ्यासरतःशांतोनिर्हताशेषकल्मषः ब्रह्मविद्ब्रह्मभवतिपरिवाडेवनेतरः
30 सर्वात्मनापरित्यागोनास्तियेषांचयतस्ततः ब्रह्मचारिगृहारण्यवासिनांयोगिनामपि सर्वात्मनाभृतत्वेनब्रह्मभा
वोयतःपरं परित्यक्तात्मदेहादिपत्नीपुत्रादिमानिनः स्वदेहमपिचामेध्यंविण्मूत्रमिवचिंतयेत् यतिकृत्यन्नवै
राग्यात्ब्रह्मेतिब्रह्मविन्नमः कर्मावकाशलेशोपिमोक्षेनास्तितनोमुने परमार्थविदोनूनंविरक्तस्यस्वचेतसः
अमेध्यंदृश्यतेसर्वंजगत्स्थावरजंगमं केश्चित्किमर्थयत्किंचित्कर्य्याज्ज्ञातश्चात्मवान् कोवामेध्यंपरित्यक्तंपुन
रंगैःविनिःक्षिपेत् विष्टाशानःशूकरोपिनस्वविष्टाशनोभवेत् स्वेनात्मनेनमुक्तस्यसंचितंकिंकरिष्यति जगत्य
भ्युदयार्थंसद्भवेत्कर्मतथाविधं यतन्कृत्यविदोनूनंनभ्रांतिश्चकदाचन इंद्रियाणिशरीरंचकर्तव्यमनसासमं
विषयेष्विवतोयानिस्वतोन्यूनस्थलेष्विव ड्ःखमुत्पादयंत्येवतदानीमायतावपि योयस्यड्ःखकृद्वैरी सतस्यैति
स्थितिर्ध्रुवं उदासेवैरिणांतावासमीपेप्यपकारिणी सतेनैवहतोभूत्वाप्राणानपिविमुंचति यतोयत्नेनदेहादी ६

नृक्षत्रवां ब्राह्मणादिभिः शोषयेद्विधिना सम्यक् न चैतैरभिभूयते यदि तैरभिभूतः स्यात्तस्यापि प्रियमप्रियं
नवेत्ति किंचित्पापिष्ठो नरकं प्रतिपद्यते ततः कर्मविपाकेन तरुगुल्मलतादिकं संप्राप्य क्रिमिकीटादिजंतुत्वं
प्रतिपद्यते भूयोभूयोप्येवमेव चक्रवत्परिवर्तते विहितं च निषिद्धं च यत्कर्म विदधीत वै संसारान्न निवर्तेत क
दाचिदपि दुःखितः नज्ञानव्यतिरेकेण मुक्तये साधनांतरे सतीह्याविद्यते सत्यं ज्ञाननिष्ठो भवान्न च तद्योगैरेव
भवति योगोप्यभ्यासपूर्वकः अभ्यासोपि यमाद्यैस्तु जायते नान्यथा मुने अधीत्य वेदशास्त्रार्थं विरक्तैः साधि
कैस्सते यमाद्यो नुष्ठीयंते त्यक्तदेहाभिमानिनः स्वदेहाद्यभिमानोपि तेषामेवानुविद्यते नित्यानित्यार्थतत्त्वज्ञाः
शांतात्मयतयोपि ये मुक्तये न परो मार्गो मुक्तये न परं तपः मुक्तये न परं ध्यानं ततोन्यं नास्ति किंचन यतित्वमु
पपद्यैव देहादौ ममतामपि त्यजकर्माखिलं सम्यक् यदि मुक्तिमपेक्षसे जानीहि सम्यगात्मानं सम्यगेव निरं
/ तरं देहादिषु गतेषु एवं स्वयमेवावशिष्यते ततः स्वतः परं किंचिद्विद्यते न तपोधन एवं च सति दुःखोत्र संसारोप्यस्ति
नो मुने यतित्वव्यतिरेकेणायो यतेन समृद्धधीः दुःखात्यंतविमुक्तो च विना वा ब्रह्म विद्यते सर्वात्मनापि सर्वेभ्यो
विषयेभ्यो निवर्तनं ब्रह्मविद्यासमाप्त्यर्थं नित्यं ब्रह्मसाधनम् तस्मात्तेन परं किंचित्साधनं मुक्तयेस्ति हि
अतस्तदयनं सर्वमंगलं सर्वसिद्धिदं यथा भागीरथी गंगा सागरेण समागता पुनाति पतितान्ब्रह्मविद्यापि भु

अ० सं वनत्रयं यदिदर्शनमात्रेणयोगाभ्यासपरायणाः सम्यग्ब्रह्मविदांश्रेष्ठनिर्मलीकृततेजगत् प्रायश्चित्तंपुनात्याश्रय
३१ द्वाद्वादशवार्षिकं विधिवत्स्वीकृतंसम्यग्यतित्वंचतथाश्रुने अतःसर्वात्मनाब्रह्मकैवल्यंनित्यमभ्यसेत् ४२ ॥
इतिश्रीअगस्त्यसंहितायामेकविंशोध्यायः ॥ २१ ॥ सुतीक्ष्णउवाच ॥ योगोनामकिमेतन्मेब्रूहियोगविदांव
र चेतसोविजयश्चकेनोपायेनस्यान्मुनीश्वर अगस्त्यउवाच समीरणःशरीरांतर्निरुध्येतयदाततः मनोप्येवंनिरु
द्धंसत्तदात्मनिसमीहते ज्ञानानंदरसंस्वादतस्मान्नैवनिवर्तते अनायासेनमनसोनिश्चलत्वमपेक्ष्यसे तदाप्यानंस
मुत्कृष्यप्राणेनोन्नीययोज्यतां प्राणापानौसमौकृत्वाचित्तमप्यात्मनिस्थितं सुखमास्वादयंस्त्येवद्वादशांतवि
धिस्मृतं तदास्वादपरःसम्यक्कदाचिदपिनत्यजेत् आदावेतान्निजानीहिशरीरोत्पत्तिकारणं उत्पन्नमप्यवने
कसंकर्मीरमात्मनः अनादिरेवसंसारोदृष्टमात्रंतुकारणं विधिस्तदनुरूपेणविधत्तेत्रयहेकिल सत्वादिभेदबहुधा
नानारूपेणभेदिताः सर्वेषामपिसंख्यातस्तेषांनास्तितपोनिधे आत्मनोबहुधानंताश्रुतिरित्येवमब्रवीत् संसारमप्य
नादित्वात्सम्यग्ज्ञानोदयानिधेः एतावदप्यतोहंतदुःखमेवानुभूयते तद्बीजान्यंडजान्याहुःस्वेदजानिविपश्चिताः
जरायुजानिबहुधाचतद्वीबहुधान्यथ सम्यंमहीमधिष्ठायोद्भिज्जायंतश्चयथ पंचभौतिकरूपाणितृणादीनित
तान्यपि तत्रपुष्पफलस्कंधशाखाभेदेनबोधत अंडजान्यपिगोधादिरूपेणाव्यवस्थितिः सुखसिद्धानिचान्यानि

31

स्वेदजानितपोनिधे एकाकीतादिरूपेणप्रतीयंतेलक्षणतो जरायुजान्ययोन्यनिंशाश्चवंतिप्रभावतः रसस्याद
ष्टस्यपक्वस्यभुक्तिलीलास्यवात्मनः स्त्रीपुंसोर्ग्राम्यधर्मेणजायतेशुक्रशोणिते तदंकुररूपेणतत्वमस्यप्रजा
यते यथाग्निरनिलंप्राप्यस्वीकारमधिगच्छति एवंशुक्रमयोजीवः शोणितंस्वस्यकर्मणा संप्राप्ययोजितःस
म्यक्वायुनोभयदेहजः योघातः पुरुषात्यन्नमलाभ्यामपितत्ववान् सोयंप्रविश्यगर्भेतमरुदन्यद्धिरत्रत
क्रियतेक्वापितेसम्यक्शुक्रशोणितदूषितः तस्मामान्येनजायंतेनरनारीनपुंसकाः सोयमेवंविधाकारोमातु
र्गर्भःप्रवर्तते प्रतिक्षणंप्रतिदिनंप्रतिमासंयथाविधिः घनीभूतस्तदंगैवमातुर्भक्तरसात्मवान् प्रथमेजलदायामे
जलबुद्बुदवद्दिने द्वितीयेप्येवमेवायंवर्द्धतेप्रतिवासरं प्रवाश्चत्वोप्ययोह्रन्मानाडीकाश्चिदंज्ञभवेत् वामांगेपिंग
लासास्याद्दक्षिणास्यान्नयोत्तरा गांधारीहस्तिजिह्वाचसपूष्यालंबुकातथा तस्यतोद्भवसंबंधवाहनास्सुमनाउ
यः तासुयाप्रथमाजातासासुषुम्नेतिगीयते यशस्विनीशंखिनीचकुहूरितिदशक्रमात् जातास्तुमध्यमास्तस्याः
सुषुम्नायाःपृथक्पृथक् भवंतिपंचपर्वाणितेभ्योलक्षत्रयंपुनः लक्षार्द्धंचशिरोजाताःशरीरंव्याप्नुयांतिच अस्थ्या
शतत्रयंषष्ट्याधिकंस्यान्मुनिसत्तम तत्तद्देशेषुचांगत्वेशश्यांगंधारयंतिच देहेस्मिन्दशविज्ञेयाजलस्यांजल
योयथा रसस्यनवसंख्यैवपुरीषस्यप्रकीर्तिताः रक्तस्यांजलयोह्यष्टौषट्श्लेष्मणाउदाहृता पित्तस्यापितथा

८ ग्र·सं पंचमूत्रस्यापिशरीरके चत्वारोनवमायास्त्रयोदेहेमेधसस्तथा एकोर्द्धंमस्तकेमज्जारेतसस्तावदेवतु स्त्रैमोजसो
३२ ष्यैवमेवमेभिर्देहोनिबध्यते दिनेदिनेष्यैवमेववर्द्धतेगंतपोयन सर्वेनाभिर्भवत्येवशिरःपादौकरावपि आधिः
स्यान्महतीतस्यषडंगेष्वेतरेवतु वामात्तिनासिकाकर्णौकपोलंचहनुद्वयं चिबुकंदंतपंक्तिश्चजिव्हाचैवोपजिव्हि
का शिरःकेशास्तथाकंठस्कंधकूर्परपाणयः नखाश्चांगुलयःकक्षौहृत्पार्श्वद्वयंतथा पृष्ठमभ्युदरनाभिलिंग
32 स्फिग्गुदादिकं ऊरूचजानुनीजंघेद्वौपादांगुलयस्तथा रोमाण्यपितत्त्वक्शरीरंतुचर्मणाछादितंमने वहिरंतश्च
रंतोवैवायवश्चालयंतिच देशाद्देशांतरंदेहेसप्तधातुनपिद्रुतं वायवःपंचदेहेस्मिन्पृथगेवप्रकीर्तिताः प्राण
स्त्वोहृदयेवायुरपानाख्योगुदेस्थितः समानाख्योपिनाभौस्यादुदानःकंठदेशजः आपादमस्तकंव्यानः समयैवा
प्यतिष्ठति नागःकूर्मश्चकृकरोदेवदत्तोधनंजयः वायवोदशदेहेस्मिन्सप्तधातुषुसंस्थिताः सप्तैवाप्येषुदेशेषु
स्वेदक्लेदांतगामिनः एवंशरीरमासाद्यप्रसूतिसमयेभृशाम् मातरंव्यथयत्यंतरुदरेविनिवर्तते नवमेदशमेमा
सिशरवद्धश्यतेभुवि प्रयशेणानिविण्मूत्रपरीतांगोपिसज्वरः योनेरवनिमासाद्यक्लेशातिशयमोहिताः आत्मा
नमपिविस्मृत्यबहिरेवप्रधावति तृत्पिपासार्तोनित्यंस्तनमेवकिलेछति दिनेदिनेवर्द्धमानःपन्नमासऋता
विह तत्वकालोक्तविषयैःसम्यगाविष्कृतोभवेत् पितृभ्यांवंधुभिःसम्यक्प्रियंनित्यंप्रमोदते संवर्द्धितःशास्त्रदेव ८

वर्षैवर्षैप्रवर्द्धितः यदितंस्वस्यसततंतदानीमायतावपि तत्सर्वंसंपरित्यज्यबहिरेवप्रवर्त्तते यद्यद्यंसर्वस्य
तस्त्यज्यपश्येदात्मानमात्मनि पतावन्यैवसंसारभयदुःखैर्विमुच्यते ४९ ॥ इतिश्रीअगस्त्यसंहितायांद्वावि
शोध्यायः २२ अगस्त्यउवाच अद्वैतानंदचैतन्यशुद्धसत्वैकलक्षण बहिरंतःसुतीक्ष्णात्रबहिरात्माप्रकाश
ते अनाद्यदृश्यमेवात्रकारणंतत्रगोपवे स्मृतंवाव्यतिरिक्तंवासर्वत्रापितपोनिधेः आधिकैर्विषयैर्नित्यंबहिरेवप्र
तीयते स्मृतोपिविषयाद्यंतःप्राप्यतस्माद्बहिर्भवेत् अतोजानीहिचात्मानमात्मन्येवनिरंतरं अन्यक्तोविषयै
र्नित्यंस्वस्वादृष्टोपकल्पितं यद्यदत्रप्रपंचेस्मिन्जंगमाजंगमात्मकं तत्रसर्वत्रचैतन्यंतिष्ठत्येवनिरंतरं कार्या
त्मनाप्रपंचोयंचैतन्यंकारणात्मना अतस्तत्तद्धिसर्वत्रभूतानांचात्रभौतिकैः अयमेवात्रचैतन्यंतस्मादन्यत्रा
किंचन परमात्माचजीवात्माब्रह्मसत्यंतदोमिति ज्ञानमानंदमित्येतत्सर्वंचैतन्यवाचकं चैतन्यान्नपरंकिंचिद
श्यतेसर्वजंतुषु प्रवृद्धस्याप्रमत्तस्यपृथिवीवद्घटादिषु अंतस्तत्वंपृथिव्यादौ दृश्यतेसर्वदेहिनां अदृष्टंकल्पयेद्य
त्रस्वीयेस्वस्मिन्भवेदिह प्रेमाभिजायतेलोकेस्वस्मिन्नात्मोपकारके नचैतत्रैवसमीचीनंयदन्योद्वाविलोक्यते
विलक्षणानिभूतानितत्कार्यंचतथाविधं स्वीयेस्वस्मिन्निवाचारःकथंतत्परिशोधयन् श्रुतिस्मृतिपुराणे
षुसर्वत्रप्रतिपादितं सर्वात्मनापिचैतन्यंसर्वमात्मनिनापरं सुतीक्ष्णउवाच ॥ लोकेतत्वंनजानातियद्यदेवा

ग्र॰ सं विमर्शितं तत्ज्ञानाद्दृष्टहान्यात्ततैर्वांतर्हितं तपः बुभुत्सुः सर्वतत्त्वज्ञो नष्टवान् प्रमादतः यदि पश्येत्त्वयं ज्योतिरेकं
३३ सर्वत्र पश्यति तदनन्यमनाः पश्येद्यदि दृष्टविषयेष्वपि तच्चैतन्यं परं पश्येन्नान्यत्किंचिदपि क्वापि पापिष्ठाः स्मरक
मीनः ततो नित्यं बहिः कृताः तत्तत्फलार्थिनः सर्वे कथं पश्यंति तद्वद कश्चिन्नैव जानाति प्रमादादेव निश्चयः अ
त्यंतागर्हितं वेत्ति विजिज्ञासुस्तथाविधः पश्य सर्वात्मना सर्वं सर्वत्रापि तपोनिधे प्रकाश्यते स्वयं साक्षात्सच्चि
दानंदलक्षणं ततोऽस्ति न परं किंचित्सद्वासनाढ्यलक्षणं तन्निरस्करणीं शाङ्करवियां ज्ञानिनामपि यामे भवति चे
तांसि विषयेष्वेव चाप्मने दृष्टस्यात्सर्वजंतूनां सुखदुःखादिलक्षणं अदृष्टांतर्हिताः सर्वाणापि सर्वत्र संस्थिताः
पश्यंति पुरतः साक्षाच्चैतन्यं सर्वगोचरं बुद्धिमानप्रमत्तो यः कदाचिद्विषयैरपि नैव प्रलोभितः साक्षादात्मानं प
रिमीक्षते एवंविधोऽपि यः कश्चित्सच्चिदानंदलक्षणं आत्मानं सर्वगं सम्यक् ज्ञानात्येव निराकुलः सञ्जीवन्नेव मु
क्तः स्याद्यद्येवं वा स्वचिंतयेत् बहिः सर्वगमानीय चैतन्यं स्वगतं पुनः पूरकेणैव योगेन सर्वतः स्थितमं ततः
सम्यगाधाय चाधारे ध्यायेद्धाममनन्यधीः शरीरांतर्गतं वायुं दशधाधातत्रतत्रत्र एकीकृत्य प्रयत्नेन सम्यक्स
र्पिस्त्वोंकृतिः वायुनापूरकाभ्यासः कर्तव्यः साधयेत्ततः ग्रंथिभेदक्रमेणैव चैतन्याग्निसमीरणैः ऊर्ध्वीयपवनं य
त्नात्कुर्यात्तन्मुखगोचरं विद्युतानंदचैतन्यसमीरस्तन्मुखागतः नयेदूर्ध्वं परं ब्रह्म पुनःपुनरपि स्वयं अभ्यासाति

श्रयेनैवभिन्नत्वयमनन्यधीः तत्परंपरयातत्रनिःस्तांतरगोचरः भूमौवीरासनंबद्धमंतरालंभवेदपि पुनर्ययैय
मेवायद्वितीयमपिभेदयेत् तदंतांतर्गतोवायुः शरीरेचोर्द्धमानयेत् हृदयग्रंथिभेदेनसम्यगभ्यासयोगतः
तत्रसंधिषुसंबंधतत्राद्यंतगतोमहत् सम्यक्संशोध्यतद्देहभ्रूमध्यमुपसर्पति तत्रास्यद्विदलेपद्मेस्वधानिधिर
लौकिकं अमृतंवाहयन्नेवअमृतत्वायकल्प्यते भिदेतंपंचमस्यैवपर्वस्याग्रेगतंपुनः तदेवंनिखिलंज्ञानंजन्मा
पिसफलंततः वैराग्येणतदप्यतित्यागेनैवहितत्परं संन्यासेनैवयोगीद्रनान्योमार्गोस्तितस्यतु वहिरंतर्गतंकृत्वा
मूलाधाराच्चचिन्मयं द्वादशांतंसमुत्क्रम्ययावन्नावर्ततेपुनः योगींद्रनान्योमार्गोयंसर्वस्मिन्नपिदर्शने नैवाप्यनुम
तमिनंसर्वैरपिसशोभितं विरज्यैन्यसेद्ब्रह्मसाक्षात्कर्त्तात्महावीभवेत् गुरुघार्थीयमेवात्रअतःकिंचिन्नविद्यते
अखंडानंदयोगेननैवात्मानंवियोजयेत् इदंसत्यमिदंसत्यंसत्यंनैवापिवर्तते यमःसत्यंपरंब्रह्मरामात्किंचिन्न
विद्यते सर्वशास्त्ररहस्यात्तमयातवमहात्मना अगस्त्यसंहितानामश्लोकेयंसर्वकामधुक् अध्यात्मलोकनेदी
पकलिकाज्ञाननाशिनी भोगमोक्षप्रदानित्यमायुरारोग्यवर्द्धिनी कृताटष्टापिलिखितावहिरंतश्चपावये
त् आदिमध्यावसानांतेयःशाकहानिरीत्यते पापात्माभिविमुक्तःस्याद्ब्रह्मभूयायकल्प्यते सर्वदालोचये
यस्तुब्रह्मवियोगसंज्ञितं प्राप्नोतिलोकमखिलंलब्धाभीतिमवाप्नुयात् पुस्तकंलिखितंयस्यगेहेतिष्ठतिपूजि

१० अ० सं ते आयुरारोग्यमैश्वर्यं वर्द्धते स्य दिने दिने पुत्रपौत्रप्रपौत्राद्यैः कुलमस्य विवर्द्धते ५० इति श्रीअगस्तिसंहिता
३४ यां त्रयोविंशोऽध्यायः ॥ २३ अगस्त्य उवाच ॥ अयमेव गुरोर्मार्गः कर्माण्येतत्परात्परं धाम एव परंज्योतिः सच्चिदानंद
परंज्योतिरयं चात्मा नयेषद्वंद्वमीड्ययोः श्रुतिः स्मृतिपुराणानि सम्यगालोच्य निश्चितं वसिष्ठवामदेवाद्यैर्नारदाद्यै
34 र्यतस्ततः यज्ञोऽयमस्माद्भूतानि जंगमाजंगमं ततः इतरेतरमिश्रेभ्यस्तेभ्यो भूतानि यज्ञिरे सर्वप्रकाशमानोऽयं ततएव
विनिर्गतः व्यक्तएषैव शारीरः परः सारविलक्षणः पंचात्मा वर्णभेदेन सोऽयमेकविधो भवेत् यद्वा वाक्यादिना
यस्य सर्वस्यांशो न विद्यते तस्य कारणरूपत्वादभिधानाभिधेययोः उपास्यः सपरं लोके तस्मिन्सर्वं प्रतिष्ठितं यान्यं
प्रकाशयेत्सर्वं परंज्योतिः स्वतः परं यादिरस्मृद्दयात्मत्वा सर्वदाभ्युदयोपकृत् अतोयत्नेन जप्यंत्व भुक्तिमुक्तिपरी
प्सुना अतः ततः परं नास्ति तदेतद्वाचको मंत्रः मंत्राणामपि सर्वेषामयमेव विशिष्यते अयमेवात्र तत्तज्ज्यकारमेका
क्षरो मंत्रः उपास्यमानोऽयं यच्छ्रेयः पुत्त्यादयति तत्परं यद्येतद्वितयंप्या ‥ नत्यासहस्रसमुक्षितं मायाममन्मथवेदादि
पूर्वोयुक्तमप्यर्वकः पंचवर्णात्मकस्तस्मादेतास्सर्वं प्रजायते चंद्रांतः परमो मंत्रो भद्रांतस्सुव्वरस्तरः पद्दिकोश्च
ष्विकोंचास्य उक्तमेव फलं विदुः श्रीमायामन्मथैकैकबीजाद्यंतगतो मंत्रः षडक्षरः सएवायं मंत्रः स्याच्चतुरक्षरः
तारमायारमानंगबीजपूर्वः सएव हि अतएवानेकधा प्रोक्तः सर्वाभीष्टफलप्रदः चंद्रभद्रनमस्कारैस्तन्नदीर्घेस्मयोजि
१०

तः षट्सप्ताष्टनवादित्वेनैवं भिन्नोऽप्यनेकधा एकादित्वेन बहुधा स्वयं रामेत्ययं परं सर्वाभीष्टं प्रयच्छंतिनोत
त्वेनापि भिद्यते पादाद्यात्मा पदाद्यात्मा तद्विशेषाद्विशिष्यते स एव भिद्यते नेतो भेदेनाप्यधिकारिणां मंत्राणा
मृषिरेतेषां ब्रह्मागस्त्यः शिवोऽप्यहं छंदो गायत्र्यमेवाऽदेवता राम उच्यते सर्वापरं बीजं शक्तिं भक्तिमुक्तिप्रयो
जनं आद्यंतयुक्तबीजेन षडंगं प्रणवैः सह वामदक्षिणयोर्वामदक्षिणयोर्भ्रुवोर्दृशोः कर्णयोर्गंडयोर्हन्वोरोष्ठ
योर्दंतमूलयोः जिह्वाननमूलयोः कंठककुदोः कुचयोरपि अंसयोर्भुजयोः पाण्योः पार्श्वयोः पृष्ठहृत्कणोः
ष्टिनाभ्योः शाक्त्युर्वोर्जान्वोर्जंघयोः पदोः विन्यसेच्छक्तिबीजेन सीतारामस्वरूपकं विन्यसेत्संहृतिन्या
सं पादादिकशिरोऽवधि उत्पत्तिन्यासमप्यत्र नाभ्यादिमधरोत्तरं न्यसेत्स्थित्यंतरन्यासं मूर्तिन्यासमतः परं तत्र
न्यासं केशवादितन्न्यासमपि विन्यसेत् सर्वांगमपि सर्वेणामंत्रेणापि च विन्यसेत् ध्यायेद्धृत्पुंडरीकांतं परंज्योतिः
परात्परं तत्रैव देवमभ्यर्च्यमानसैरुपचारकैः जपेत्कांचनचैकांते रामं ध्यायन्ननन्यधीः चरज्जीमूतसंकाशं विद्युद्ग
णांबरावृतं संतप्तकांचनप्रख्यां सीतामंकगतां पुनः अन्योन्याश्लिष्टपृष्ठाङ्गनेत्रपश्यंतमादरात् दक्षिणेन करांग्रे
णाचिबुकं कुटिलालकं स्पृशंतं च स्तनोत्संगपरिहासैर्मुहुर्मुहुः विनोदयंतं तांबूलचर्वणैकपरायणाम् सर्व
रूपोज्ज्वलं द्वंद्वं योषित्पुरुषयोरिव श्रीरामसीतयोः सर्वसंपन्मुक्तिफलप्रदं जपहोमार्चनादीनि कुर्यात्कर्माणि

ग्रं· सं संततं यत्किंचिदप्यनंतं स्यात्सत्यं सत्यं न संशयः तदेतद्वाचको मंत्रः सर्वस्यार्थस्य साधकः स तस्य वाचकस्त्वायं मं
३५ त्रो विजयते परः रामात्मनो मनःस्यः कीर्तनास्मरणादपि ब्राह्मणं तत्र नियं वैश्यं शूद्रं हत्वापि कल्मषं संचिनोति त
तो मोहाद्यद्यत्तदपि नाशयेत् ग्रामारण्यपशून्हत्वा संचितं दुरितं च यत् निःशेषान्नाशयत्येव रामात्माक्षरो मनुः
उन्मत्तवाचको गणादिभवोद्भवकृतार्चितः मद्यपानेन यत्पापं तदप्याशु विनाशयेत् अभक्ष्यभक्षणात्पापं मिथ्या
ज्ञानसमुद्भवं सर्वं विलयते राममंत्रस्यास्य संकीर्तनात् श्रोत्रियस्वर्णहरणात् यच्च पापमुपार्जितं रत्नादेरपहा
रेण तदप्येवं विनाशयेत् गत्वा तु मातरं मोहाद्गम्यायाश्च योषितः उपस्थानेन मंत्रेण रामस्तदपि नाशयेत्
महापातकपापिष्ठसंगत्या संचितं च यत् नाशयेत्तत्कथालापशयनासनभोजनैः पितृमातृवधोत्पन्नं बुद्धि
पूर्वमघं च यत् निःशेषं नाशयत्येव कालत्रयसमुद्भवं भ्रातृमित्रस्वसृणां यद्वा विश्वासघातकः यदि वा लव
धोत्पन्नं विषशास्त्रघातकं गुरुपुत्रकलत्रादिवधोत्पन्नं दुरात्मनां तदनुध्यानमात्रेण सर्वमेतत्प्रलीयते त
त्सद्गुरूपदिष्टेन वर्त्मनानुष्ठितः पुनः रामात्मा मनुरेवायं पापराशिविनाशकृत् यत्नयागादितीर्थेषु प्रायश्चि
त्तादिकैरपि नैवापनुद्यते पापं तदप्याशु विनाशयेत् आत्मतल्पस्वर्णादिदानेवज्रविधेरपि किंचिदपि परी(
हार्यं पापं तदपि नाशयेत् न याति संचितं पापं वज्रमूलमघं च यत् तन्मंत्रस्मरणादेव निःशेषं तत्क्षणाच्छ्यति ५०॥

इतिश्रीअगस्तिसंहितायांचतुर्विंशोध्यायः २४ ॥ सुतीक्ष्णउवाच ॥ सर्वांगमेकंतत्त्वज्ञब्रह्मनिष्ठतपो
धन रामात्मनत्वयातत्त्वंब्रह्मणःपरमव्ययं प्रदर्शितंसम्यगेवसविस्तरमनेकधा षडक्षरविधानंतुसम्य
ग्ज्ञानंत्वयाविभो अन्येषांराममंत्राणामनुष्ठानंमहामुने षडक्षरविधानंतुविधानांतरमस्तिवा सर्वमेवसमा
चक्ष्वभक्तस्यमयिसुव्रत अगस्त्यउवाच सुतीक्ष्णशृणुवक्ष्यामिश्रद्दधानायतेपुनः भक्तस्तुतवयत्नेनयतस्त्वंवै
लवोन्नमः येशृण्वंतिकथांविष्णोर्वदंतिचरितंहरेः मुकुंदाश्चगायंतिहरिंस्तुवंतिसस्वरं आनंदाश्रुपरीतात्मा
गात्रेपुलकार्चितः आनंदनिर्भरश्चैवप्रस्खलतिपदेपदे उच्चैःश्रीरामरामेतिवदंतिचहसंतिच एवमादिगुणो
युक्ताआत्मारामसमाहिते वैष्णवामानवाःसर्वेमुक्तिदाःस्युःक्रमेणहि राममंत्रास्तुविशेषेणशीघ्रमुक्तिप्रदाःस्मृ
ताः विनैवदीक्षांविप्रेंद्रपुरश्चर्यांविनैवहि वैष्णवन्यासविधिनाजपमात्रेणसिद्धिदाः सामान्येनतुसर्वेषां
मन्त्राणांचैवस्यात् अनुष्ठानविधिर्ज्ञेयोविशेषस्त्वत्रतत्रवै वक्ष्यतेहिमहाभागयथाविधिसविस्तरं षडक्षरविधा
नंतुसर्वेषांप्रकृतिंविदुः भूतशुद्धिविधानंतुन्यासःसर्वेषामादितोमुने न्यासाःपूर्वोदिताःसर्वेकार्यायत्नेनसुव्रत म
न्त्रेतेषुसर्वेषामधिकारोस्तिदेहिनां आश्रमस्थाश्चसर्वेपिमंत्राणामधिकारिणः मुमुक्षुभिर्विरक्तैश्चसदासेव्यो
रघूत्तमः यतीनांयतचित्तानांसुपास्यःप्रणवोयथा दीक्षाविधिस्तुपूर्वोक्तोविधेयोदेशिकोत्तमैः संध्यांचदीक्षि

अ॰सं
१६
३६

तः कुर्य्यात्ततन्मंत्रानुसारतः प्राणायामस्तु गायत्र्याः सर्वेषामपि सत्तम जलाभिमंत्रणं वापि मूलमंत्रेण मार्जनं जल
/स्य प्राशनं वापि तत्पंचार्घस्य मार्जनं सीतामंत्रेण कुर्वीत मूलमंत्रजपं तथा उपस्थानादिकाः कार्य्यास्तत्रैव द्विजसत्तमैः
सूर्य्यमंडलमध्यस्थं सीतारामसमन्वितं नमामि पुंडरीकाक्षं मांजनेयगुरुं परं नमोऽस्तु वामदेवाय ज्योतिषां पतये नमः
साक्षिणे सर्वलोकानां परमानंदरूपिणे रघुनाथाय दिव्याय महाकारुणिकाय च नमोऽस्तु कौशिकानंददायिने विष्णु
रूपिणे त्रिकालमेवं यः कुर्य्याद्रामपवभवेत्स्वयं गुरुस्मर्य्यात्तु सर्वेषामुक्तमार्गेण चेष्यते एवं सिद्धमनुर्मंत्री प्रत्यह
नियतव्रतः चतुर्भुजं शंखचक्रगदापद्मधरं विभुं किरीटिनमुदारांगं वनमालोपशोभितं सीतालंकृतवामांगं
पीतांबरधरं विभुं शुद्धस्फटिकसंकाशं ज्वलंतं तेजसा मुने अथवा द्विभुजं देवं नीलोत्पलसमद्युतिं अनेकादि
त्यसंकाशं पद्मस्योपरि संस्थितिं कांचनप्रभया देव्या वामभागस्थयान्वितं लक्ष्मणेन धृतच्छत्रं स्वर्णाभेन धीमता
अनेकैः सेवितं दिव्यपरिवारैरनेकशः मानसैरुपचारैस्तु संपूज्य यत्ततः परं कल्पवृक्षसमुद्भूतैर्भावितं मनसा चिरं
मूलमंत्रजपं कुर्य्यान्नियतं नियतेंद्रियः बाह्यपूजां ततः कुर्य्यात्साधनैर्न्यायतोर्जितैः अन्यायेनार्जितैः पूजाभिः फला
/मुनिसत्तम बाह्यपूजां प्रवर्तते सतीत्वान्मुनिसत्तमः स्वगृहे शुद्धभूभागे विलिप्ते गोमयांभसा सुवितानसमायुक्ते पु
ष्पाद्यैः समलंकृते गीतवाद्यमहोत्सवैः सर्वतः समलंकृते शुद्धासने समासीन उपचारैरनेकधा चंदनागुरुकस्तू

रीकर्पूरकुसुमादिभिः हिमांबुनासहसंयुक्तैः ... पूजां महात्मने करवीरैश्च संफुल्लैः श्वेतरक्तैः सुगंधिभिः
पुन्नागैः चंपकैश्चैव मुकुलैः शतपत्रकैः जातीभिर्मल्लिकाभिश्च कल्हारैः कमलैरपि पाटलैः केतकीपुष्पैः
पूजयेद्रघुनंदनं बैल्वैश्च सर्वपुष्पैश्च विप्र पूजां प्रयत्नतः कुर्यात्त्रिकालं विधिवद्विधिज्ञः साधकोत्तमः वि
नापि शं विप्र नार्यो बैल्वैः पूजयेद्धरिः सहस्रकपूजितोपि स्यादपूजित इति ध्रुवं धूपैश्च विविधैः सुगंधैर्गुग्गु सौम्यः
लोद्भवैः स्नेहसंयुक्तविपुलवर्तिकाभिरथैकया आवर्तिभिरनेकाभिः स्थापिताभिः प्रयत्नतः पद्मस्वस्ति
करूपेण हंसाकारेण वा पुनः भ्रामयेद्रघुनाथस्य पुरस्तात्तु ततो ध्रुवं नैवेद्यमन्नभोज्यादि पूजितं पुरतः
स्थितं सूपापूपघृतोपेतं पायसाद्यं सशर्करं बहूपदंशसंशोभि सघृतं सदधिप्रियं निवेदयेत्प्रयत्ने
न साधितं शुद्धमुज्ज्वलं कर्पूरशकलैर्युक्तं पूगीफलमनोरमं तांबूलं रघुनाथाय दत्वा कामानवाप्नुयात्
पूर्वोक्तमेव संतेपाद्विधानं गदितं मुने सर्वेषां राममंत्राणामेवमेव कृतं पुनः त्रिकालमेककालं वा य एवं
पूजयेत्सदा सार्वभौमेश्वरो भूत्वा राममेवमवेदिह ॥ ४४ ॥ इति श्रीअगस्त्यसंहितायां पंचविंशो
ध्यायः ॥ २५ ॥ अगस्त्य उवाच सर्वाख्यानसारं ते सर्ववाणोत्तमोत्तमं रहस्यं कथयिष्यामि सुतीक्ष्ण
मुनिसत्तम चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ उदये गुरुगौरांशे स्वोच्चस्थे ग्रहपंचके मेषे पूषणि

अ॰सं संप्राप्ते लग्ने कर्कटकाह्वके आविरासीत्स्वकलया कौशल्यायां परः पुमान् तस्मिन्दिने तु कर्तव्यमुपवासं व्रतं
३० सदा तत्र जागरणं कुर्याद्रघुनाथपरो भुवि प्रातर्दशम्यां कृत्वा तु संध्याद्याः कालिकाः क्रियाः संपूज्य विधिवद्रा
मं भक्त्या वित्तानुसारतः ब्राह्मणान्भोजयेद्भक्त्या दक्षिणाभिश्च तोषयेत् गोभूतिलहिरण्याद्यैर्वस्त्रालंकरणैस्तथा
रामभक्तान्प्रयत्नेन प्रीणयेत्परया मुदा एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतं अनेकजन्मसिद्धानि पातकानि
37 बहून्यपि भस्मीकृत्य व्रजत्येव तद्विष्णोः परमं पदं सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः अशुचिर्वापि पापि
ष्ठः कृत्वेदं व्रतमुत्तमं पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः यस्तु रामनवम्यां तु भुंक्ते स च नराधमः ।
कुंभीपाकेषु घोरेषु पच्यते स नराधमः त्रैलोक्यपापमश्नाति स धर्मो निष्फलो भवेत् यस्तु रामस्य नवमीमना
दृत्य नराधमः नास्तिक्यान्न परं गच्छेद्यावदाचंद्रतारकं अकृत्वा रामनवमीव्रतं सर्वोत्तमोत्तमं व्रतान्यन्यानि कुरु
ते न तेषां फलभाग्भवेत् रहस्यकृतपापानि प्रख्यातानि बहून्यपि महांति च प्रणश्यंति श्रीरामनवमीव्रता
त् एकामपि नरो भूत्वा श्रीरामनवमीं मुने उपोष्य कृतकृत्यः स्यात्सर्वपापैः प्रमुच्यते नरो रामनवम्यां तु श्रीरा
मप्रतिमाप्रदः विधानेन मुनिश्रेष्ठ स मुक्तो नात्र संशयः ॥ सुतीक्ष्ण उवाच ॥ श्रीरामप्रतिमादानविधानं च
कथं मुने कथय त्वं हि रामस्य भक्तस्य मम विस्तरात् अगस्त्य उवाच ॥ कथयिष्यामि तद्दिव्यं प्रतिमादान [illegible]

मुत्तमं विधानं स्थापयित्वेन यतस्त्वं वैष्णवोत्तमः अष्टम्यां चैत्रमासे तु शुक्लपक्षे जितेन्द्रियः दंतधावनपूर्वं तु
प्रातः स्नायाद्यथाविधिः नद्यां तडागे कूपे वा स्वदेशस्तवर्णे तथा ततः संध्यादिकं कृत्वान्तं स्मरन् राघवं हृदि
गृहमागत्य विप्रेंद्र कृत्वा होमासनादिकं दांतं ऋद्धं विनीतं विप्रं वेदशास्त्रपरायणं श्रीरामपूजानिरतं सुशीलं दं
/ भवर्जितं विधिज्ञं राममंत्राणां राममंत्रैकसाधनं आहूय भक्त्या ब्राह्मणं ऽयात्तं संपूज्य प्रार्थयेदिति श्रीरामप्रतिमा
दानं करिष्येऽहं द्विजोत्तम तत्राचार्यो भव प्रीतः श्रीरामोपि त्वमेव मे इत्युक्त्वा तेन तं विप्रं स्नापयित्वा ततः परम्
तैलेनाभ्यर्च्य स्नायात्स्वयं तु यन्नाघवं हृदि श्वेतांबरधरः शीनगंधमाल्यानि धारयन् अर्चितो भूषितश्चैव कृतमाध्या
ह्निकक्रियः आचार्यं भोजयेद्भक्त्या सात्विकान्नैः सुविस्तरं भुंजीत स्वयमप्येवं हृदि राममनुस्मरन् एकभक्तव
तीतत्र सहाचार्येण दृढव्रतः श्रुण्वन्नामकथादिव्या महः शेषं नयेत्ततः सायंसंध्यादिकाः कार्याः क्रिया राममनु
स्मरन् आचार्यसहितस्तत्र अधःशायी जितेंद्रियः स्वपेत्स्वयं सवैकान्ते श्रीरामार्पितमानसः ततः प्रीतः समुत्था
य स्नात्वा संध्याय यथाविधेः प्रातः कर्माणि सर्वाणि शीघ्रमेव समापयेत् ततः स्वस्थमना भूत्वा विद्वद्भिः सहितो
न च स्वगृहे चोत्तरे देशे दानस्योत्तमं मंडपं चतुर्द्वारं पताकाद्यं सवितानं सतोरणं मनोरमं महोत्सेधं पुष्पा
द्यैः समलंकृतं शंखचक्रहनूमद्भिः प्राग्द्वारे समलंकृतं गरुत्मता शार्ङ्गबाणेश्च दक्षिणे समलंकृतं गदाखड्गा

अ॰सं गदेश्चैव पश्चिमे समलंकृते पद्मस्वस्तिकनीलैश्च कौवेरे समलंकृते मध्ये हस्तं चतुष्कोणं वेदिका हस्तमायतं
२८ वृत्तिवादित्रगीतैश्च ग्रन्थैश्चापि सुसंयतं पुण्याहं वाचयेत्तत्र विद्वद्भिः प्रीतमानसः ततः संकल्पयेद्देवं राम
मेव स्मरन्मुने अस्यां रामनवम्यां तु रामाराधनतत्परः उपोष्याष्टसु यामेषु पूजयित्वा यथाविधिः इमां स्व
र्णमयीं रामप्रतिमां समलंकृतां श्रीरामप्रीतये दास्ये रामभक्ताय धीमते प्रीतो रामो हरत्वाशु पापानि सुबहू
नि मे अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च ततः स्वर्णमयीं रामप्रतिमां पलमानतः निर्मितां द्विभुजां दि
38 व्यां वामांकस्थितजानकीं बिभ्रतीं दक्षिणे करे ज्ञानमुद्रां महामुने वामेनाधः करेणाथ देवीमालिंग्य संस्थितां
सिंहासने राजते च पलद्वयविनिर्मिते ततः पंचामृतस्नानं संपूज्य विधिवत्ततः मूलमंत्रेण नियतो न्यासपूर्व
मतंद्रितः दिवैवं विधिवत्कृत्वा रात्रौ जागरणं ततः दिव्यां रामकथां श्रुत्वा रामभक्तैः समन्वितः नृत्यगीता
दिभिश्चैव रामस्तोत्रैरनेकधा पूजयन्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः ततः प्रातः समुत्थाय स्नानसंध्यादिकाः
क्रियाः समाप्य विधिवद्रामं पूजयेत्सुसमाहितः ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवित् पूर्वोक्तपद्मकुं
डे वा स्थंडिले वा समाहितः लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः साज्येन पायसेनैव स्मरन्राममनन्य
धीः ततो भक्त्या सुसंतोष्य आचार्यं पूजयेन्मुने कुंडलाभ्यां सरत्नाभ्यामंगुलीयैरनेकधा गंधपुष्पाक्षतैर्वस्त्रैः

विविधैः सुमनोहरैः ततो रामं स्मरन्दद्यादेनंमंत्रमुदीरयन् इमांस्वर्णमयींरामप्रतिमांसमलंकृतां पीतवस्त्रयुग
च्छन्नांरामोहंराघवायते श्रीरामप्रीतयेदास्येरामभक्तायधीमते प्रीतोरामोहरत्वाशुपापानिसुबहून्यपि अन्ये
भ्यश्चयथाशक्त्याद्यं गोहिरण्यादिशक्तितः दद्याद्ब्राह्मणेभ्योगंधान्यंयथाविभवमादृतः ब्राह्मणैःसहभुंजीततेभ्योद
द्याश्चदक्षिणां ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः तुलापुरुषदानानिफलंप्राप्नोतिसुव्रत अनेकजन्मस
ञ्चितपापेभ्योमुच्यतेध्रुवं बहुनात्रकिमिहोक्तेन मुक्तिस्तस्यकरेस्थिताः कुरुक्षेत्रेमहापुण्येसूर्यपर्वणिशेषतः
तुलापुरुषदानाद्यैः कृतैर्यल्लभतेफलं तत्फलंलभ्यतेमर्त्यैर्दानेनानेनसुव्रत ५८ ॥ इतिश्रीअगस्त्यसंहि
तायांषड्विंशोध्यायः २६ ॥ सुतीक्ष्णउवाच प्रायेणाहिनराःसर्वेदारिद्र्याःकृपणामुने असमर्थाहिदानेस्मिन्
कथंतेषांवदप्रभो अगस्त्यउवाच अशक्तास्तुमहाभागस्वस्ववित्तानुसारतः पलार्द्धेनतदर्द्धेनतदर्द्धार्द्धेन।
वापुनः वित्तशाठ्यमकृत्वैवकुर्याद्व्रतमिदंमुने यदाचोरतरांश्रद्धांयातनांनेहतेक्वचित् अकिंचिनोपिनिय
मात्पौष्यनवमीदिने कृत्वाजागरणंभक्त्यारामभक्तैःसमन्वितः स्मरन्नाममपियामभक्त्यासजपेद्विधिवन्मुने
जपन्नाममन्त्रंमायारमानंगसमन्विते एकाक्षरंवाविधिवत्सर्वन्यासकृतोमतिः प्रातःस्नात्वाचविधिवत्कृ।
त्वासंध्यादिकाःक्रियाः गोभूतिलहिरण्यादिदद्याद्वित्तानुसारतः श्रीरामचंद्रभक्तेभ्योविद्वद्भ्यःश्रद्धयान्वितः।

अ॰सं
३५

39

पारणं च प्रकुर्वीत ब्राह्मणैः सह भक्तितः य एवं कुरुते भक्त्या सर्वपापैः प्रमुच्यते प्राप्ते श्रीरामनवमीदिने मर्त्यो
विमूढधीः उपोषणं न कुरुते कुम्भीपाके निमज्जति यत्किंचिद्रामसमुद्दिश्य नो ददाति स्वशक्तितः सुतीक्ष्ण उवाच
यामाष्टके प्रपूजायै त्वया प्रोक्ता महामुने मूलमन्त्रेण चेत्युक्तं तत्कथं वद सुव्रत अगस्त्य उवाच सर्वेषां राममं
त्राणां मन्त्रराजः षडक्षरः तारकं ब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते दशमाध्यायविधिना पूजा कार्या प्रयत्नतः
द्वारपीठाङ्गदेवानामावृतीनां तथैव च सन्निरोधनमेवात्र अवगुण्ठनमञ्जसा ततो मुद्राभिर्देवं सदा देवं संप्रार्थ्य भक्ति
तः षोडशपूजां प्रकुर्वीत पूर्वोक्तविधिना मुने कलशं वामभागस्थं पूजाद्रव्याणि चादरात् पात्रसंशोधयेद्भक्त्या
प्यात्मानं मन्त्रमुच्चरेत् प्रतियामं षोडशपूजां कुर्याद्देवमनुस्मरन् पात्रासादनमप्येवं कुर्याद्यामेष्वतन्द्रितः नवां
बराणि देवाय प्रार्थयन्नर्पयेत्सुधीः स्वर्णयज्ञोपवीतानि दद्याद्देवाय शक्तितः नानारत्नविचित्राणि दद्यादा
भरणानि च हिमाम्बुघृष्टकविरचन्दनसारसमन्वितं गन्धं दद्यात्प्रयत्नेन सरागं च सकुङ्कुमं मूलमन्त्रेण सकला
नुपचारान्प्रकल्पयेत् कल्हारकेतकीजातीपुन्नागाद्यैः प्रपूजयेत् चम्पकैः शतपत्रैश्च सुगन्धैः सुमनोहरैः घं
टां च वादयन् धूपं दीपं चास्मै निवेदयेत् भक्ष्यभोज्यादिकं भक्त्या देवाय विधिनार्पयेत् एवं सोपस्करं देवं दत्त्वा
पापैः प्रमुच्यते जन्मकोटिकृतैर्घोरैः नानारूपैः सुदारुणैः विमुक्तस्तत्क्षणाद्देव राम एव भवेन्मुने अह

धानस्यते प्रोक्तं श्रीरामनवमीव्रतं सर्वलोकहितार्थाय पवित्रं पापनाशनं लोहेन निर्मितां वापि शिलया दारु
णापि वा येन केन प्रकारेण यस्मै कस्मै कमात्मने चैत्रशुक्लनवम्यां तु दत्वा विप्राय शक्तितः महादानादि
तुल्यं स्याद्रामोद्देशेन कल्पिता वित्तशाठ्यमकृत्वैव सर्वं कुर्यात्स भक्तितः जपेदेकांतआसीनयावस्याद्दशा
मीदिनं तेनैव स्यात्स्वरूपर्थ्याद्दशम्यां भोजयेद्द्विजान् भक्ष्यभोज्यैर्बहुविधैर्दद्याच्छक्त्या च दक्षिणां कृतकृत्यो
भवेत्तेन सम्यग्रामः प्रसीदति तुलसीतिथनधायातिजनराहृत्तिगर्भितं द्वादशाष्टशतेनापि यत्पापंनापनुयते
विलयं याति तत्सर्वं श्रीरामनवमीदिने जपं च राममंत्राणां यो न जानाति तत्सत उपोष्य च स्मरन्रामं न्यास सर्व
मनन्यधीः प्रगोर्लभमनुर्य्यस्तत तस्य न्यासप्रवःसरं यामे यामे च विधिवत्पूजां कार्यात्समाहितः प्रमुक्तवापि
ह्निसदा श्रीरामनवमीव्रतं मुच्यते सर्वपापेभ्यो याति ब्रह्मसनातनं ॥ २४ ॥ इति श्री अगस्त्यसंहितायां स
प्तविंशोध्यायः ॥ २७ ॥ अगस्त्य उवाच ॥ चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः पुनर्वसूऋक्षसंयुक्ता
स्वल्पापि यदि दृश्यते चैत्रशुक्लेन नवम्यां तु सा पुण्या सर्वकामदा श्रीरामनवमी प्रोक्ता सूर्यकोटि ग्रहाधिका
चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि तस्मिन्दिने महापुण्ये राममुद्दिश्य भक्तितः यत्किंचित्क्रियते कर्म तद्
वत्यतयं प्रभं उपोषणं जागरणं तस्मात्कुर्याद्विशेषतः यस्तु रामनवम्यां तु दद्याद्वित्तानुसारतः यत्किंचिद

ग्र॰सं पितत्सर्वंमहादानसमंभवेत् यस्तुरामनवम्यांतुकुर्याद्रामव्रतंयदि तुलापुरुषदानादिफलमाप्नोतिमानवः सूर्य
५० ग्रहेकुरुक्षेत्रेमहादानैःकृतैर्गुरुः यत्फलंतदवाप्नोतिश्रीरामनवमीव्रतं कुर्याद्रामनवम्यांतुउपोषणमतंद्रितः मा
तृगर्भमनाप्नोतिनैवरामोभवेत्स्वयं नवमीचाष्टमीविद्धात्याज्याविष्णुपरायणैः उपोषणंनवम्यांतुदशम्यामेवपार
णं नीलोत्पलदलश्यामंपीतांबरधरंविभुं द्विभुजंकांतनयनंदिव्यसिंहासनेस्थितं वसिष्ठाद्यैश्चपरितोवृतंरत्नकि
रीटिनं सीतासंलापचतुरंदिव्यगंधादिशोभितं चामरद्वयकरेणात्सेवितंलक्ष्मणेनव शत्रुघ्नभरताभ्यांचपार्श्वयोर
प्यसेवितं ध्यायन्ननन्यहृदयोद्वादशाक्षरमन्वहं प्रजपेद्धीतितोनित्यंश्रीरामन्यासपूर्वकं मंत्रसंख्यांविधायैवत्रिका
लंपूजयेत्सदा सतीत्याउवाच भगवन्योगिनांश्रेष्ठसर्वशास्त्रविशारद किंतत्वंकिंपरंजाप्यंकिंज्ञानंमुक्तिसा
धनं ज्ञातमिच्छामितत्सर्वंब्रूहिमेमुनिसत्तम अगस्त्यउवाच सतीत्यात्वंमहाभागशृणुवक्ष्यामितत्वतः यत्प
रंयद्गुणातीतंयज्ज्योतिरमलंफलं तदेवपरमंतत्वंकैवल्यपदकारणं श्रीरामेतिपरंजाप्यंतारकंब्रह्मसंज्ञितं
ब्रह्महत्यादिपापघ्नमितिवेदविदोविदुः श्रीरामरामरामेतियेवदंतिचसर्वदा तेषांभुक्तिश्चमुक्तिश्चभविष्य
तिनसंशयः नमस्कृत्यप्रवक्ष्यामिराममंत्रमनामयं अयोध्यानगरेरम्येरत्नमंडलमध्यगे स्मरेत्कल्पतरोर्मूले
रत्नसिंहासनंशुभं तन्मध्येष्टदलंपद्मंनानारत्नप्रवेष्टितं सौवर्णंराजतंवापिकारयेद्रघुनंदनं पार्श्वेभरतशत्रु

ध्रोद्धृतचामरधारिण्यौ चापद्वयसमायुक्तं लक्ष्मणं कारयेत्सुधीः पीतांबरगतं श्याममिंद्रनीलसमप्रभम् को
मलांगं विशालाक्षं द्विभुजं वर्णविराहृतं भानुकोटिप्रतीकाशकिरीटेन विराजितं रत्नग्रैवेयकेयूररत्नकुंडलमं
डितं रत्नकंकणमंजीरकटिसूत्रैरलंकृतं श्रीवत्सकौस्तुभोरस्कं मुक्ताहारोपशोभितं सौवर्णे राजते वापि षट्
कोणं च समुल्लिखेत् अभावे बिल्वपीठे च स्थापयेद्रघुनंदनं वस्त्रद्वयसमायुक्तं दिव्यरत्नविभूषितं अष्टशक्तिस
मायुक्तं देवेशं पूजयेत्क्रमात् प्रणवं सर्वमुख्यार्थं नमः शाङ्गं ततो वदेत् भगवत्पदमाभाष्य वासुदेवाय इत्यपि
ततः सर्वभूतात्मने योगपीठात्मने नमः इति मंत्रेण तन्मध्ये कूर्म्यात्पुष्पांजलिं ततः एवं संपूजिते पीठे देवमावाह्य पूज
येत् अर्घ्यादि धूपदीपांतमुपचारान् विधाय च ततो रघुत्तमं देवेशं परिवारांश्च पूजयेत् सर्वं षट्कोणकोष्ठेषु हृदया
दीन् षट्क्रमात् मूलमंत्रेण कर्तव्या उपचारास्तु षोडश इंद्रादिलोकपालांश्च वसिष्ठादिमुनीनपि सर्वदिक्पालमंत्रे
ण पूजयेद्भक्तिसंयुतः अशोककुसुमैर्युक्तमर्घ्यं देवस्य दापयेत् दशाननवधार्थाय धर्मसंस्थापनाय च दानवानां वि
नाशाय दैत्यानां निधनाय च परित्राणाय साधूनां रामो जातः स्वयं हरिः गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोनघ
प्रतियामं विशेषेण अर्चयेद्रघुनंदनं पुराणैः स्तोत्रपाठैश्च वेदपारायणेन च नृत्यैर्गीतैर्वाद्यैश्च रात्रिशेषं व्यपोह्य
च प्रातः स्नात्वा च गायत्रीं जप्त्वा संध्यामुपास्य च दशाक्षरेण मंत्रेण देवेशं मनसा स्मरेत् ~~न्यासाद्यकृतविधानः शोकास्तथा~~

अ.सं देवदेवंप्रणम्याथसर्वंवत्सजयेद्धृदि ॥ ५० ॥ इतिश्रीअगस्तिसंहितायांअष्टाविंशोध्यायः ॥ २८ ॥ सुतीक्ष्ण
५१ उवाच सर्वेतिहासतःशास्त्रश्रुतिस्मृतिविदांवर न्यासाबहुविधाप्रोक्तास्त्वयादौमंत्रयोगतः तत्राशक्तःकथंकुर्यां
त्कथयस्वमहामुने अगस्त्यउवाच न्यासःस्यान्मंत्रसन्नाहोन्यासहीनोनसिद्धिदः तस्मान्न्यासाःप्रयत्नेनकर्तव्याः
सिद्धिमिच्छता अवैष्णवानांचमंत्राणांसर्वेषांचविशेषतः न्यासःकेशवकीर्त्यादिस्तत्वन्यासस्ततःपरं न्यासःपरम
51 हंसाख्यःप्रणवन्यासईरितः मातृकांबिंदुसंयुक्तांशुद्धांमन्मथसंयुतां मायावेदादिसंयुक्तांप्रणवादिंतथैवच
आभ्यंतरीमातृकांचकृत्वानुष्ठानमाचरेत् अस्यानुष्ठानमखिलंकर्तुंमुनिसत्तम अशक्तश्चेन्मंत्रमात्रमुच्चरन्नियतो
व्वहं सर्वान्कामानवाप्नोतिसरामोराममाश्रयात् सुतीक्ष्णउवाच श्रुतंत्वत्तोमयाब्रह्मन्रामस्याद्भुतकर्मणः विधा
नंसरहस्यंचमंत्रादीनामनेकशः दशाक्षरादिमंत्राणांविधानंचविशेषतः ध्यानंचविधिवत्सम्यग्ब्रह्मन्प्रश्नैकसाध
नं इदानींश्रोतुमिच्छामिप्रतिष्ठाविधिमंजसा कदाकुत्रकथंचेतिसर्वंतत्वमतोहिमे ब्रूहिप्रदयतःस्वामिन्यतस्का
रुणिकोभवान् अगस्त्यउवाच सम्यक्पृष्टंत्वयाब्रह्मन्ननुग्रहात्कुरुतरंपरं यःपशुपतिपरांपुण्यांप्रतिष्ठाविधिवत्कृतां
सोपिपुण्यतमोलोकेपापात्सद्योविमुच्यते श्रीरामस्यप्रतिष्ठायाःफलंवक्तुंपितामहः नशक्तःस्यान्महेशोपिसहस्र
वक्त्रोपिच येनकेनप्रकारेणयत्रकुत्रापिवामुने यैःकैश्चिद्वाकृतंचेत्स्याल्लोकेधन्यतमाहिते कालप्रतीक्षा ॥ नोकुर्याद्धि

यिं चापि विशेषतः यदैव भक्तिरुत्पन्ना तदा स्थाप्यो रघूद्वहः अथवा ह्येनवम्यां तु माघशुक्लदिनेपि च चंद्रतारादि
संपन्ने प्रतिष्ठाप्यो रघूत्तमः मार्गशीर्षेथवा ज्येष्ठे वैशाखे वा समाहित मूलादिदोषरहिते प्रतिष्ठां राघवस्य तु प्र
कुर्यात्स्वविधानेन भक्त्या शक्त्या प्रयत्नतः श्रीगोपालप्रतिष्ठाया श्रावणे शस्यते सदा नरसिंहस्य वैशाखे केशव
/स्यापि शस्यते चैत्रे तु रामचंद्रस्य माघे चापि बलान्विते अनंतस्यापि माघे स्यादन्येषां तु यथारुचिः सर्वकालेपि
सर्वत्र प्रतिष्ठाप्यो रघूत्तमः लग्नं तिथिर्वारो वा न नक्षत्रबलं तथा चैत्रशुक्लनवम्यां तु स्थाप्यो रामो शुभस्तुभिः
सर्वान्कामानवाप्नोति माघे शुभबलान्विते कुर्वन्नृ श्रीरामचंद्रस्य प्रतिष्ठां भाग्यवान्नरः मार्गशीर्षे च वैशाखे प्येवमे
व यथाविधि सूर्यग्रहे महापुण्ये कुरुक्षेत्रे विधानतः कृतैर्यत्पुण्यमाप्नोति तुलापुरुषकादिभिः तत्पुण्यं प्रा
प्नुयान्मर्त्यः प्रतिष्ठाप्य रघूत्तमं यः कुर्याद्रामचंद्रस्य प्रतिष्ठां विधिवन्नरः ऐहिकानखिलान्भोगान्भुक्त्वा नाराय
णो भवेत् वर्द्धते च कुलं भूयः कल्पकोटिशताधिकं नापंडितो न वा मूर्खो न दरिद्रोपि तत्कुले नावैष्णवोपि जायते
कदाचिदपि कुत्रचित् ५ लोहेन निर्मितां वापि दारुणा वा यथाविधि कारयेत्प्रतिमां रम्यां श्रीरा
मस्य शुभे दिने लक्ष्मणस्य च सीताया मारुतेश्च विशेषतः सीता स्वर्णनिभा कार्या लक्ष्मणो पीतप्रभो भवेत्
संशोध्य देवतागारं निर्माणस्थानमुत्तमं शालालोष्ठादिवर्ज्यं च कुर्यात्प्रयत्नेन शोधयेत् एवं तद्वद्देशं च तत्

अ सं लोत्पत्तिर्यथा भवेत् पाषाणसिकताद्यैश्च पूरयेत्पूर्ववत्सुधीः कुट्टिमं च प्रकुर्वीत निर्वासस्थानमुत्तमं शालालोष्टा
५२ दिवर्जितैः शुद्धरम्यशिलापट्टैरनेकैश्च सुविस्तरैः देवावासप्रदेशात्तु पूर्ववद्भूमिकोन्नतं हस्तद्वयोन्नतं कुर्यात्सु(
विस्तीर्णमनोहरं प्राकारं कारयेत्तत्र चतुर्गोपुरसंयुतं पीठं रम्यं प्रकुर्वीत शिलायां वा समोन्नतं हस्तद्वयायतं कु
र्याच्चतुरस्रं सुशोभनं अग्रभागे हन्नूमंतं पीठस्य विलिखेन्मुने पीठशुद्धिं प्रकुर्वीत वक्ष्यमाणविधानतः लिखेदा
ग्नेयदिग्भागे सुग्रीवं हि भुजंगमनः दक्षिणे भरतं चैव नैरृते च विभीषणं पश्चिमे लक्ष्मणं चैव वायव्ये अंगदमेव च श
त्रुघ्नं चोत्तरे कुर्यादीशानी ऋक्षनायकं ततः श्रीरामचंद्रं च पीठस्योपरि संलिखेत् सौवर्णे राजते वापि ताम्रे वापि यथा
विधिः शिलायां वा प्रकुर्वीत चतुरस्रं सुशोभनं द्वात्रिंशदंगुलं वापि षोडशांगुलमेव वा देवस्य स्थापनस्थाने तद्यं
त्रं स्थापयेन्मुने अंकुरार्पणमादौ तु सप्त पंच त्रिवासरे यथाविधि प्रकुर्वीत चंद्रताराबलान्विते गणेशप्रार्थनं कुर्या
त्सर्वविघ्नोपशांतये सौवर्णप्रतिमां हस्त्यश्ववस्त्रद्वयसमन्वितां कुटिंबिने दरिद्राय ब्राह्मणाय निवेदयेत् एकाक्षरगणे
शस्य ध्यानमार्गेण यत्नतः श्रीरामप्रतिमा चापि दशाक्षरविधानतः अनुष्टुभेन वा वापि द्वादशाक्षरमार्गतः येन केना
पि मार्गेण कारयेद्विधिवन्मुने ॥ ३० ॥ इति श्रीअगस्तिसंहितायामूनत्रिंशोऽध्यायः ॥ २९ ॥ सुतीक्ष्ण उ
वाच कथं दशाक्षरादीनां मार्गो विश्रुतिसत्तम आचक्ष्व सरहस्यं मे त्वयि भक्तस्य सत्तम अगस्त्य उवाच ॥ साधुवत्स

मिसत्यं ते श्रृणुषड्भाव हितो मम सीतालंकृतवामांकं द्विभुजं चारुलोचनं वामहस्तेन सीतायाः स्पृशंतं स्तनमंडलं
ज्ञानमुद्रायते नान्येनार्पितं लोकसुंदरं यत्नेईस्यधृतापि लक्ष्मणेन सुशोभितं कोटिकंदर्पसंकाशं राघवं करुणाक
रं उपविष्टं पद्ममध्ये वीरासनमनोहरं हनुमत्सेवितं चाग्रे ऊर्ध्याद्देवं मनोहरं दशाक्षरोयं कथितो विधिनानुनिषंग
वैः नीलोत्पलदलश्यामं पीतांबरधरं विभुं द्विभुजं कंजनयनं दिव्यसिंहासने स्थितं वशिष्ठाद्यैः परिवृतं हाररत्न
किरीटिनं सीतासंलापचतुरं दिव्यगंधादिशोभितं चापद्वयकरेणारात् सेवितं लक्ष्मणेन च शत्रुघ्नभरताभ्यां च
पार्श्वयोरुपशोभितं ध्यायन्ननयी रामं द्वादशाक्षरमन्वहं प्रजपेद्दीक्षितो नित्यं श्रीरामं न्यासपूर्वकं मंत्रसंध्यावि
धायैव त्रिकालं पूजयेत्सदा क्रीडंतं सीतया साकं नीलजीमूतसन्निभं हृषाकपींद्रकृदैयं वसिष्ठेन स्मृतं विभुं तद्वथा
यस्तु सौमित्रे चापवाणादिहोदितं चापद्वयभृता पश्चाल्लक्ष्मणेन सुशोभितं सर्वलोकहितोयुक्तं पीतांबरधरं विभुं ध्या
यन्नमाक्षरं जप्त्वा सर्वपापैः प्रमुच्यते सजलांबुदसंकाशं पंचवाणकरं मुने ध्यायन्नष्टाक्षरं जप्त्वा राम एव भवेत्ततः ज्ञान
मुद्रालसद्बाहुं हनुमत्सेवितं पुनः शत्रुघ्नभरताभ्यां च लक्ष्मणेन समावृतं ध्यायन्नेकाक्षरं जप्त्वा भुक्तेर्भवति भाजनं
अन्याश्च मूर्तयः संति बह्व्यो वै मुनिसत्तम आसामन्यतमा मूर्तिः स्थापनीया प्रयत्नतः मंत्राश्च वै सर्वा उक्ता मूल
मंत्रस्य मंजसा देवस्यापि प्रकुर्वीत ततो हनुमतः परं प्राणप्रतिष्ठा न्यासान् यथाविधि विचक्षणः लक्ष्मणस्य

पिमंत्रस्य ततो देवस्य मारुतेः शत्रुघ्नभरतादीनां कुर्याद्यत्नेन देशिकः ॥ सुतीक्ष्ण उवाच लक्ष्मणादिमन्त्राणां च वि
धानं लक्ष्मणाग्रजे वक्तुमर्हसि मे सर्वं भक्तस्य दयानिधे अगस्त्य उवाच शृणु वक्ष्यामि ते सर्वं सविस्तरमनेकधा
रेफस्थं वं समुद्धृत्य बिंदुलक्ष्मणसंयुतं ङेंतो यं लक्ष्मणाय ततो नमसा च समन्वितः ऋषिः स्यादहमेवास्य गायत्रं छंद उच्य
ते लक्ष्मणो देवता प्रोक्ता लं बीजं शक्तिरस्य हि नमस्तु विनियोगो हि पुरुषार्थचतुष्टये द्विभुजं स्वर्णरुचिरतनुं अति पद्म
शोभनं धनुर्बाणकरं रामसेवासंसक्तमानसं रामवत्स्वर्णपीठस्थं ऊर्मिलेशमहं भजे मन्त्रापि वै सर्वा प्रोक्ता सांगावरणवर्जि
ते समलक्ष्य शरश्चर्यी ततः सिद्धिस्तु साधयेत देवत्यास्तु पूर्वमेवोक्तं सह रामेण तद्भवेत भरतस्यैवमेवास्य शत्रुघ्नस्याप्ययं
विधिः श्रीरामपूजानिरतमेतेन विजयेत्सदा आदौ वाप्यंततो वापि पूजायां राघवस्य तु एतेषामपि कर्तव्यं भुक्तिमुक्ति
फलेप्सुभिः प्राधान्येन पृथक्त्वेन अंगत्वे रामपीठके हनूमतोप्येवमेव पूजां कुर्याद्यतंद्रितः पूर्वं नमः पदं चोक्त्वा
ततो हनुमते पदं आंजनेयपदं ङेंतं महाबलपदं तथा वह्निजायांतमेवस्यान्मंत्रो हनुमतः परम् सर्वसिद्धिकरः प्रो
क्तः सर्वेषामपि सिद्धिदः मालाख्यः परमो मंत्रो मारुतेः सर्वसिद्धिदः लक्ष्मणस्तु सदा पूज्यः प्राधान्येनैव नित्यशः
वैष्णवं न्यासजालं तु सर्वं कृत्वा समाहितः भूतशुद्धिं विधायैव मातृकामपि यत्नतः विधाय मानसीं पूजां बाह्यपूजा
मपि स्वयं त्रिकालमेककालं वा नित्यमेकांतसेवितः साफल्यं रामपूजायां यदीच्छति स वै जनः तेन यत्नेन कर्तव्या

५३

लक्ष्मणस्तस्य विस्तरात् श्रीराममंत्रभेदास्तु बहवः संति वै मुने तत्साधकैः सदा कार्या सौमित्रेरपि नित्यशः प
रं त्वत्रापि लोकेस्मिन् यथा सेव्यो मुमुक्षुभिः तथैव लक्ष्मणमंत्रः सदा सेव्यो भवेदिह दशाक्षरादिमंत्राणां साफल्य
मपि वांछता सेव्योयं हि सदा मंत्रपहिकामुष्मिकप्रदः अजप्त्वा लक्ष्मणमंत्रं राममंत्रं जपंति ये तज्जाप्यस्य फलं
नैव प्रयांति कुशला अपि अरिमित्रविवेकोपि नैव कार्यो भवेदिह रामस्य जापकैर्नित्यं सदा सेव्यो यमंजसा यो जपेल्लक्
ष्मणमंत्रं नित्यमेकांतमास्थितः मुच्यते सर्वपापेभ्यः स कामानश्नुतेखिलात् मनोवाक्कायकर्मोत्थैरभ्यसैरप्य
नेकधा महद्भिरपि पापौघैर्मुच्यते नात्र संशयः सर्वान्कामानवाप्नोति याति विष्णोः परं पदं ५ ५ इति श्रीअगस्ति
संहितायां त्रिंशोध्यायः ३० ॥ अगस्त्य उवाच श्रीरोदितस्य मंत्रस्य प्रयोगमपि चांजसा कथयामि यथाशक्तिः सर
हस्यं सविस्तरं प्रयोगाद्येव मंत्रोयमुपदिष्टो हि शार्ङ्गिणा अर्जुनस्य पुरा सम्यग्गीते तेनैव धनंजयः दिशो विजित्य स
कलाः शत्रूंश्चैव बहून्यपि प्राप्तिस्य यद्धर्मराजं पैत्रकं राज्यमुत्तमं जयप्रधानो मंत्रोयं राज्यप्राप्त्येकसाधनं योजपेन्नि
यतो मंत्रं लक्षमेकं समाहितः सोचिरान्नष्टराज्यः सन् प्राप्नोत्येव न संशयः अभिषिक्तमयोध्यायां ध्यायेद्राममनन्
न्यधीः पंचायुतमिमं जप्त्वा नष्टराज्यमवाप्नुयात् नागपाशविनिर्मुक्तं ध्यायन्नेकांतमास्थितः अयुतं प्रजपन्
मुच्येन्निगडाद्यैस्तथैव हि आंजनीयसमानीतमहौषधिगतव्यथं ध्यायेन्नयुतं जाप्येन अपमृत्युं जयेन्नरः इंद्रजि

अ० सं
४४

स्मरणाद्धं तारं ध्यायन्नेव समाहितः दुर्जयं चापि वेगेन जयेद्वैरिकुलं बहु सर्पेण त्वास्तानामास्याच्छेदनोद्यक्रमान
सं ध्यायन्नसहस्रजाप्येन भूतप्रेतादिकान् जयेत् रामपादाब्जसेवार्थं नित्यसत्वमनुस्मरन् जपनप्युतमेकांते महा
रोगान्बहूनपि त्वपस्मारकुष्ठादिनाशयत्येव तत्क्षणात् त्रिमासं नियताहारो जपेल्लक्षसहस्रकं दिने दिने।
विधानेन रुजं जयेद्विजितेंद्रियः अष्टोत्तरशतैः पुष्पैः निर्विद्धैः शतपत्रकैः पायसं शर्करोपेतं नैवेद्यं विधिवन्मुने
घनसारसमायुक्तं चंदनेनानुलिप्य च देवो ध्येयेन नित्यं च सहस्रमेवं द्विजोत्तम। कुष्ठरोगात्प्रमुच्येत दुश्चिकित्स्या
दनेकशः त्वग्दोषजा बहुविधाः मंडलादिप्रभेदकाः ते सर्वे नाशमायांति दुश्चिकित्स्या अपि क्षणात् एकांते निय
ताहारः षण्मासान्विजितेंद्रियः जपन्नेव विधानेन क्षयरोगात्प्रमुच्यते माषान्नपानं नैवेद्यं जपेन्मंत्रं समाहितः
वातरोगात्प्रमुच्येत बहुभेदादपि क्षणात् अभिमंत्र्य जलं नित्यं मंत्रेण त्रिः समाहितः पीत्वा संध्यासु संभक्त्या
मुच्यते सर्वरोगतः दारिद्र्यं नाशयित्वा तु श्रियमाप्नोत्यनुत्तमां विषादिदोषसंस्पर्शो न भवेच्च कदाचन प्रत्य
हमेव प्रति दिनं श्रुत्वं भक्त्या समाहितः शुद्धनेत्रादिसंभूतान्जयेद्रोगान्सुदारुणान् पीत्वाभिमंत्रितं जलं
कुक्षिरोगान्बहून् जयेत् देवस्य प्रतिमाद्वानं कृत्वा भक्त्या विधानतः सर्वेभ्योऽपि च रोगेभ्यो मुच्यते नात्र संशयः कन्या
र्थी चोर्मिलापाणीग्रहणी सक्तमानसं ध्यायन्लतं जपित्वा तु बहुवालाजैर्दशांशतः ईप्सितां प्राप्नुयात्कन्यां शीघ्रमेव

तपोधन दीक्षितं स्तंभनात्स्त्रीणां मंत्रेण नियतव्रतः संस्मरन्विधिवन्नित्यं मासत्रयमनन्यधीः सुस्नाग्रः स
रं समसहस्रनियतेंद्रियः जपन्निखिलविद्यानां तत्त्वज्ञो भवति ध्रुवं विश्वामित्रकृतवरेकृत्वाद्भुतपराक्रमं ध्याय
न्नघतजाप्येन भयेभ्यो मुच्यते चिरात् संध्यां चोपास्य विधिवन्मूलमंत्रेण मंत्रवित् त्रिकालं नियतो भूत्वाकृत।
नित्यविधिः स्वयं दीक्षायुतो यथान्यायं सर्वज्ञाग्ररः सरः मुच्यते सर्वपापेभ्यो याति विष्णोः परं पदं पठिकान
न यंत्येव निष्कामो यार्चयेद्धरिं दीक्षां प्राप्य विधाने न गुरोर्विगतकल्मषात् स्वाचारनिरताद्दाता कृष्णस्याद्विजितें।
द्रियात् तदनुज्ञानसारेण शुश्रूषया यथाविधि। ससर्वान्गुणपापौघान्दग्ध्वा निर्मलमानसः पुनरावृत्तिरहि
तं शाश्वतं पदमाप्नुयात् सकामो वांछितान्कामान्भुक्त्वा भोगान्मनोरमान् जातिस्मरश्चिरं भूत्वा याति विष्णोः परं
पदं यथा श्रीराममंत्राणां प्रयोक्तुः पापसंभवः न तथा लक्ष्मणमनोः किंतु याति परां गतिं मंत्रोऽयं ब्रह्मणा पूर्वं त
ष्टेन मनसा चिरं सूर्यगृहेऽरुस्तेत्रे मत्वं दत्तो हिमादरं मयोप्युपासितो यं वै भक्तियुक्तेन चेतसा शक्रभक्तिसमालोक्य
मामेवास्मात्करोदृषिः उपास्य बहवो लोके मंत्रमेतमनेकशः संप्राप्य वांछितानर्थान्गमद्वैष्णवं पदं नानेन सदृ
शो मंत्रो मया दृष्टो हिज्ञत्रवित् शैववैष्णवशौरेषु गाणपत्येषु वा मुने केचिन्मुक्त्यर्थमेव स्युः केचिद्दैहिकसाधनाः
भक्तिमुक्तिप्रदस्त्वायमेको विजयते परं ५० ॥ इति श्रीअगस्तिसंहितायामेकत्रिंशोऽध्यायः ३१ ॥ स्वती।

प्र॰ सं
५५

45

ह्णउवाच सर्ववेदार्थतत्वज्ञ मुने निश्चितमानसः सम्यक्तं शिक्षितं श्चाहं बहुधापि कृपालुना त्वया कारुण्यपति
धिना सर्वमज्ञस्तथा जडः त्वत्प्रसादेन संजातज्ञानोस्मि गतकल्मषः रामात्मनि परंब्रह्मण्यासक्तं मम मानसं लक्ष्म
णेपि तथा रामे किंचिद्वेदोस्ति नैव हि हनुमन्मंत्रश्शस्त्रक्तं त्वया वै मुनिपुंगव तस्यानुष्ठानमेवाहं ज्ञातुमिच्छामि ते प्रभो:
त्वयि प्रसन्ने सकलं मा वत्स दयानिधे अगस्त्यउवाच स्मारितः सम्यगेवाहं त्वया श्रद्धावता मुने आंजनेयमंत्र
लोके भुक्तिमुक्त्येकसाधनं प्रकाशितः शंकरेण लोकानां हितमिच्छता भूतप्रेतपिशाचादिडाकिन्यो ब्रह्मराक्ष
साः दृष्ट्वा च प्रपलायंते मंत्रानुष्ठानतत्परं ऋषिरीश्वर एवास्यादनुष्टुप्छंद उच्यते हनुमान्देवता प्रोक्ता हवी
जं शक्तिरंत्यजैः कीलकं ह्रांत्रयं प्रोक्तं वेदकं तु हसौ पुनः हनुमत्प्रीणनं चैव फलमायसदीरितं सर्वेप्सितानां दातत्व
मस्यैवाज्जिनचान्यतः प्रणवं पूर्वमुच्चार्य नमो भगवते पदं इतं प्रकटसंयुक्तं पराक्रमपदं तथा यथाक्रांतपदोपे
तं दिक्मंडलमुदीरयेत् यशोवितानधवलीकृतजगत्त्रितयकं वज्रदेहेति च पदं रुद्रावतारपदं तथा संक्षयंतपराले
कापुरीदहनमीरयेत् उदधिलंघनं चापि दशग्रीवकृतांतकृत् सीतायाश्वासनपदं मंजनीगर्भसंभवः श्रीराम
लक्ष्मणानंदकरकपिसैन्यप्राकार सुग्रीवसाधारणपदं सर्वतोच्चाटनं तथा बालब्रह्मचारिनिति तथा गंभीरशब्द
पदं तथा डाकिनीध्वंसनपदं ततस्तारमुदीरयेत् मायाह्रांत्रयमुच्चार्य भस्मने ह्रिव देततः सर्वविषं हरपह बलं सो

भयमे सर्वकार्याणि साधयेति द्विकस्थरेत् ह्रूं फट् स्वाहेति मंत्रोयं मालाख्यः सर्वकामधुक् नमो भगवते चांजने
यायेत्यंगस्त्राभ्यां प्रदीरितः रुद्रमूर्तये इत्येव तर्जनीभ्यामनंतरं रामदूताय च तथा कनिष्ठाभ्यां विचक्षणाः
ब्रह्मास्त्रनिवारणाय च तथा अस्त्रमंत्रोयमीरितः एवं षडंगं च मुने कृत्वा ध्यायेदनन्यधीः स्फटिकाभं स्वर्णकां
तिं द्विभुजं च कृतांजलिं कुंडलद्वयसंशोभिमुखांभोजं हरिं प्रभुः अथ तं तत्र रम्ये वा रामस्याग्रे शिवस्य वा पूजां च
वैष्णवे पीठे शैवे वा विदधीत वा आहुतिभिस्तु नित्यं नक्ताशी विजितेंद्रियः ग्रहरोगनिवृत्त्यर्थमष्टोत्तरशतं मुने
दिनत्रयमथो जप्त्वा भूतानां मुच्यते भयात् भूतप्रेतपिशाचादिशांतयेऽष्टोत्तरं शतं जप्त्वा च तन्मयान्मुक्तो भवत्येव
न संशयः महारोगादिशांत्यर्थमष्टोत्तरसहस्रकं जपात्तस्मात्प्रमुच्येत निश्चितं नियताशनः जयाभिकांक्षिणां
राज्ञामस्मादन्यो न विद्यते ध्यायेद्रामस्य दूतं तं नियतं नियताशनः जपेन्नियमवांश्चैव जयेद्दुर्जयमप्यरिं संधानं
यत्र सुग्रीवसंधातारं स्मरन्नपि अथ तेनैव वलिना संधिमाप्नोत्यसंशयः लंकायादाहकं ध्यायेज्जपन्नेतं मंत्रसा
धकः राष्ट्रं दहत्येव ह्यग्न्याद्विमपि चानघ जयार्थे रिपुसिंहानां अस्मादन्यो न विद्यते यस्तु गेहे हनूमंतं सर्वदेव
प्रपूजयेत् वदंते तस्य मंत्रेण तस्य लक्ष्मीरचंचला दीर्घमायुर्भवेदेवं सर्वत्र विजयी भवेत् मयादिभूतसंतो
भतदेशे नैव जायते शैवानां वैष्णवानां च षट्क्रमोत्र प्रदर्शितः नान्यत्स्थापनमस्त्येव मंत्रादस्माद्धनूमतः।

अ सं चैरेव्याघ्रगजादीनामयमेवपरायणं परापहृतराज्यानांबाधितानांपरैःपुनः सन्नाहभाजेप्रहर्षंपुष्पायप
५९ दसैनिकः याञाकालेहन्तुमेतंस्मरन्यस्तुस्वकाद्गृहात् निर्गच्छतिसवेगेनइष्टार्थमधिगच्छति स्थापका
लेस्मरेन्नित्यंचैारभूतान्दिकान्जयेत् ॥ ५० ॥ इतिश्रीअगस्तिसंहितायांद्वात्रिंशोध्यायः ३२॥
समाप्तोयंग्रंथः॥

मंत्रशास्त्र

त्रागस्तसंहिता

अङ्क ५२१५